नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

३२ देवेन्द्रस्तव-प्रकिर्णकंसूत्रम्

सच्छायं

(नवमं-प्रकिर्णकम्)

(मूलम् + संस्कृत छाया)

मू. (१) *अमरनरवंदिए वंदिऊण उसभाइजिणवरिंदे ।*
वीरवरअपच्छिमंते तेलुक्कगुरू पणमिऊणं ॥

छा. अमरनरवन्दितान् वन्दित्वा ऋषभादिजिनवरेन्द्रान् ।
अपश्चिमवीरवरान् तान् त्रैलोक्यगुरून् प्रणम्य ॥

मू. (२) *कोई पढमपाउसंमि सावओ समयनिच्छयविहिण्णू ।*
वन्नेइ थयमुयारं जिनमाणे वद्धमाणम्मि ॥

छा. कश्चित् श्रावकः समयनिश्चयविधिज्ञः प्रथमप्रावृषि
वर्णयति स्तवमुदारं जातबहुमाने वर्द्धमाने ॥

मू. (३) *तस्स थुणंतस्स जिणं सोइयकडा पिया सुहनिसन्ना ।*
पंजलिउडा अभिमुही सुणइ थयं वद्धमाणस्स ॥

छा. तस्य जिनं स्तुवतः समीपे कृतश्रुतिका प्राञ्जलिपुटा
ऽभिमुखी प्रिया वर्द्धमानस्य स्तवं सुखनिषण्णा शृ णोति ॥

मू. (४) *इंदविलयाहिं तिलयरयणंकिए लक्खणंकिए सिरसा ।*
पाए अवगयमाणस्स वंदिमो वद्धमाणस्स ॥

छा. इन्द्रवनिताभिस्तिलकरत्नाङ्कितान्लक्षणाङ्कितान् ।
अपगतमानस्य वर्द्धमानस्य पादान् शिरसा वन्दामहे ॥

मू. (५) *विनयपणएहि सिढिलमउडेहिं अप(पय)डियजसस्स देवेहिं ।*
पाया पसंतरोसस्स वंदिमो वद्धमाणस्स ॥

छा. विनयप्रणतैः शिथिलमुकुटैर्देवैः प्रशान्तरोषस्यापति(प्रकटि)त
यशसो वर्द्धमानस्य पादान् वन्दामहे ॥

मू. (६) *बत्तीसं देविंदा जस्स गुणेहिं उवहम्मिया छायं ।*
तो (नो) तस्स वियच्छेयं पायच्छायं उवेहामो ॥

छा. (६) द्वात्रिंशद् देवेन्द्रा गुणैर्यस्य छायायामागताः ।
ततस्तस्य विगतच्छेदां पादच्छायामाश्रयामः ॥

मू. (७) *बत्तीसं देविंदत्ति भणियमित्तंमि सा पियं भणइ ।*
अंतरभासं ताहे काहेमो कोउहल्लेणं ॥

छा. द्वात्रिंशद्देवेन्द्रा इति भणितमात्रे सा भणति ।
प्रियमन्तरभाषां करिष्यामि कौतूहलेन ॥

मू. (८) *कयरे ते बत्तीसं देविंदा को व कत्थ परिवसइ ।*
केवइया कस्स ठिई को भवणपरिग्गहो तस्स ॥

छा. कतरे ते द्वात्रिंशद् देवेन्द्राः ? को वा कुत्र परिवसति ।
कियती कस्य स्थिति ? को भवनपरिग्रहस्तस्य ॥

मू. (९) *केवइया व विमाणा भवना नगरा व हुंति केवइया ।*
पुढवीए व बाहल्लं उच्चत्त विमाणवन्नो वा ॥

छा. कियन्ति वा विमानानि भवनानि नगराणि वा भवन्ति कियन्ति ?
पृथिव्या वा बाहल्यमुच्चत्वं विमानवर्णो वा ॥

मू. (१०) *का रंति व का लेणा उक्कोसं मज्झिमजहन्नं ।*
उस्सासो निस्सासो ओही विसओ व को केसिं ॥

छा. किंरमणाः किंलयनाः उत्कृष्टमध्यमजघन्यैः ।
उच्छ्वासो निश्वासोऽवधिर्विषयो वा कः केषाम् ॥

मू. (११) *विनओवयार ओवहम्मियाइ हासवसमुव्वहंतीए ।*
पडिपुच्छिए पियाए भणइ सुअणु ! तं निसामेह ॥

छा. विनयोपचारप्राप्तया वचनाङ्गीकार(हासवश)मुद्वहन्त्या ।
इह प्रियया प्रतिपृष्टो भणति सुतनो ! त्वं निशमय ॥

मू. (१२) *सुअनाणसागराओ सुणिओ पडिपुच्छणाइ जं लद्धं ।*
पुन वागरणावलिअं नामावलियाइ इंदाणं ॥

छा. श्रुतज्ञानसागरात् श्रुतं प्रतिपृच्छया यल्लब्ध ।
पुनर्व्याकरणबलवन्नामावलिकादि इन्द्राणाम् ॥

मू. (१३) *सुण वागरणावलिअं रयणं व पणामियं व वीरेहिं ।*
तारावलिव्व धवलं हियएण पसन्नचित्तेणं ॥

छा. शृणु व्याकरणबलवद् रत्नवद् वीरैर्दत्तं ।
तारावली धवलं हृदयेन प्रसन्नचेतसा ॥

मू. (१४) *रयणप्पभाइकुडनिकुडवासी सुतणू ! तेउलेसागा ।*
वीसं विकासियनयणा भवणवई ते निसामेह (ससदिट्ठी सव्वदेविंदा) ॥

छा. रत्नप्रभादिकुड्यनिष्कुटवासिनः सुतनो ! तेजोलेश्याकाः ।
विंशतिर्विकसित नयना भवनपतयस्तान् निशमय ॥

मू. (१५) *भवणवई दो इंदा चमरे वइरोअणे असुराणं ।*
दो नागकुमारिंदा भूयानंदे य धरणे य ॥

छा. द्वौ भवनपतीन्द्रौ चमरो वैरोचनोऽसुराणाम् ।
द्वौ नागकुमारेन्द्रौ भूतानन्दश्च धरणश्च ॥

मू. (१६) *दो सुयणु ! सुवण्णिंदा वेणूदेवे य वेणुदाली य ।*
दो दीवकुमारिंदा पुण्णे य तहा वसिट्ठे य ॥

छा. द्वौ सुतनो ! सुवर्णकुमारेन्द्रौ वेणुदेवश्च वेणुदालिश्च ।
द्वौ द्वीपकुमारेन्द्रौ पूर्णश्च तथा वशिष्टश्च ॥

मू. (१७) *दो उदहिकुमारिंदा जलकंते जलपभे य नामेणं ।*
अमियगइअमियवाहण दिसाकुमाराण दो इंदा ॥

छा. द्वावुदधिकुमारेन्द्रौ जलकान्तो जलप्रभश्च नाम्ना ।
अमितगतिरमितवाहनो दिक्कुमाराणां द्वाविन्द्रौ ॥

मू. (१८) *दो थाउकुमारिंदा वेलंब पभंजणे य नामेण ।*
दो थणियकुमारिंदा घोसे य तहा महाघोसे ॥

छा. द्वौ वायुकुमारेन्द्रौ वेलम्बः प्रभञ्जनश्च नाम्ना ।
द्वौ स्तनितकुमारेन्द्रौ घोषश्च तथा महाघोषः ॥

मू. (१९) *दो विज्जुकुमारिंदा हरिकंत हरिस्सहे य नामेणं ।*
अग्गिसिहाऽग्गिमाणव हुयासणाईवि दो इंदा ॥

छा. द्वौ विद्युत्कुमारेन्द्रौ हरिकान्तो हरिसहश्च नाम्ना ।
अग्निशिखाऽग्निमानवौ हुताशनपती अपि द्वाविन्द्रौ ॥

मू. (२०) *एए विकसियनयणे ! दसविसि वियसियजसा मए कहिया ।*
भवणवरसुहनिसन्ने सुण भवणपरिग्गहमिमेसिं ॥

छा. एते विकसितनयने ! दशदिग्विकसितयशसो मया कथिताः ।
भवनवरसुखनिषण्णे ! शृणु भवनपरिग्रहमेषाम् ॥

मू. (२१) *चमरबइरोअणाणं असुरिंदाणं महानुभागाणं ।*
तेसिं भवणवराणं चउसट्ठिमहे सयसहस्से ॥

छा. चमरवैरोचनयोरसुरेन्द्रयोर्महानुभागयोः ।
तेषां भवनवराणां चतुःषष्टिरधः शतसहस्राणि ॥

मू. (२२) *नागकुमारिंदाणं भूयाणं दधरणाण दुण्हंपि ।*
तेसिं भवणवराणं चुलसीइमहे सयसहस्से ॥

छा. नागकुमारेन्द्रयोर्भूतानन्दधरणयोर्द्वयोरपि ।
तेषां भवनवराणां चतुरशीतिरधः शतसहस्राणि ॥

मू. (२३) *दो सुयणु ! सुवण्णिंदा वेणूदेवे य वेणुदाली य ।*
तेसिं भवणवराणं बावत्तरिमो सयसहस्सा ॥

छा. द्वौ सुतनो ! सुवर्णेन्द्रौ वेणुदेवश्च वेणुदालिश्च ।
तयोर्भवनवराणां द्वासप्तति शतसहस्राणि ॥

मू. (२४) वाउकुमारिंदाणं वेलंबपभंजणाण दुण्हंपि ।
तेसिं भवणवराणं छन्नवइसहे सयसहस्सा ।।

छा. वायुकुमारेन्द्रयोर्वेलम्बप्रभञ्जनयोर्द्वयोरपि ।
तेषां भवनवराणां षन्नवतिरधः शतसहस्राणि ।।

मू. (२५) चउसट्ठी असुराणं चुलसीई चेव होइ नागाणं ।
बावत्तरि सुवण्णाणं वाउकुमाराण छन्नउई ।।

छा. चतुःषष्टिरसुराणां चतुरशीतिश्चैव भवति नागानाम् ।
द्वासप्तति सुवर्णानां वायुकुमाराणां षन्नवति ।।

मू. (२६) दीवदिसाउदहीणं विज्जुकुमारिंदथणियमग्गीणं ।
छण्हंपि जुयलयाणं बावत्तरिमो सयसहस्सा ।।

छा. द्वीपदिशुदधीनां विद्युत्कुमारेन्द्रस्तनिताग्नीनाम् ।
षण्णामपि युगलानां द्वासप्तति शतसहस्राणि ।।

मू. (२७) इक्किक्कम्मि य जुयले नियमा बावत्तरि सयसहस्सा ।
सुंदरि ! लीलाइ ठिए ठिईविसेसं निसामेहि ।।

छा. एकैकस्मिंश्च युगले नियमादासप्तति शतसहस्राणि ।
सुन्दरि ! लीलया स्थिते ! स्थितिविशेषं निशमय ।।

मू. (२८) चमरस्स सागरोवम सुंदरि ! उक्कोसिया ठिई भणिया ।
साहीया बोद्धव्वा बलिस्स वइरोयणिंदस्स ।।

छा. चमरस्य सागरोपमं सुन्दरि ! उत्कृष्टा स्थितिर्भणिता ।
साधिका बोद्धव्या बलेर्वैरोचनेन्द्रस्य ।।

मू. (२९) जे दाहिणाण इंदा चमरं मुत्तूण सेसया भणिया ।
पलिओवमं दिवड्ढं ठिई उक्कोसिया तेसिं ।।

छा. ये दक्षिणानामिन्द्राश्चमरं मुक्त्वा शेषा भणिताः ।
पल्योपमं द्वयर्द्धं स्थितिरुत्कृष्टा तेषाम् ।।

मू. (३०) जे उत्तरेण इंदा बलिं पमुत्तूण सेसया भणिया ।
पलिओवमाइं वुन्नि उ देसूणाइं ठिई तेसिं ।।

छा. ये उत्तरत इन्द्रा बलिं प्रमुच्य शेषा भणिताः ।
पल्योपमे द्वे एव देशोने स्थितिस्तेषाम् ।।

मू. (३१) एसोवि ठिइविसेसो सुंदररूवे ! विसिट्ठरूवाणं ।
भोमिज्जसुरवराणं सुण अनुभागो सुनयराणं ।।

छा. एषोऽपि स्थितिविशेषः सुन्दररूपे ! विशिष्टरूपाणां ।
भौमेयसुरवराणां शृ ण्वनुभागं सुनगराणाम् ।।

मू. (३२) जोअणसहस्समेगं ओगाहित्तूण भवणनगराइं ।
रयणप्पभाइ सव्वे इक्कारस जोअणसहस्से ।।

छा. योजनसहस्रमेकमवगाह्य भवननगराणि ।
रत्नप्रभायां सर्वाणि एकादश योजनसहस्राणि ॥

मू. (३३) *अंतो चउरंसा खलु अहियमनोहरसहावरमणिज्जा ।*
बाहिरओऽविय वट्टा निम्मलवइरामया सव्वे ॥

छा. अन्तश्चतुरस्राणि खलु अधिकमनोहरस्वभावरमणीयानि ।
बाह्यतोऽपि वृत्तानि निर्मलवज्रमयानि सर्वाणि ॥

मू. (३४) *उक्किण्णंतरफलिहा अब्भिंतरओ उ भवणवासीणं ।*
भवणनगरा विरायंति कणगसुसिलिट्ठपागारा ॥

छा. उत्कीर्णान्तरपरिखा अभ्यन्तरतस्तु भवनवासिनाम् ।
भवननगराणि विराजन्ते सुश्लिष्टकनकप्राकाराः ॥

मू. (३५) *वरपउमकण्णियामंडियाहिं हिट्ठा सहावलट्ठेहिं ।*
सोहिंति पइट्ठाणेहिं विविहमणिभत्तिचित्तेहिं ॥

छा. वरपद्मकर्णिकामण्डिताभिरधः स्वभावलष्टैः ।
शोभन्ते विविधमणिभक्तिचित्रैः प्रतिष्ठानैः ॥

मू. (३६) *वंदनपइट्ठिएहि य आसत्तोसत्तमल्लदामेहिं ।*
दारेहिं पुरवरा ते पडागमालाउरा रम्मा ॥

छा. चन्दनपदस्थितैरासक्तोत्सक्तमाल्यदामभिर्द्वारैः (शोभन्ते)
तानि पुरवराणि पताकामालातुराणि रम्याणि ॥

मू. (३७) *अट्ठेव जोयणाइं उव्विद्धा हुंति ते दुवारवरा ।*
धूमघडियाउलाइं कंचनदामोवणद्धाणि ॥

छा. अष्टौ च योजनान्युद्विद्धानि भवन्ति तानि द्वारवराणि ।
धूपघटिकाकुलानि काञ्चनदामोपनद्धानि ॥

मू. (३८) *जहिं देवा भवणवई वरतरुणीगीयवाइयरवेणं ।*
निच्चसुहिया पमुइया गयंपि कालं न याणंति ॥

छा. यत्र देवा भवनपतयो वरतरुणीगीतवादितरवेण ।
नित्यसुखितः प्रमुदिता गतमपि कालं न जानन्ति ॥

मू. (३९) *चमरे धरणे तह वेणुदेव पुण्णे य होइ जलकंते ।*
अमियगई वेलंबे घोसे हरी अ अग्गिसिहे ॥

छा. चमरो धरणस्तथा वेणुदेवः पूर्णश्च भवति जलकान्तः ।
अमितगतिर्वेलम्बो घोषो हरिश्चाग्निशिखः ॥

मू. (४०) *कणगमणिरयणथूभियरम्माइं सवेइयाइं भवणाइं ।*
एएसिं दाहिणओ सेसाणं दाहिणे(उत्तरे)पासे ॥

छा. कनकमणिरत्नस्तूपिकारम्याणि सवेदिकानि भवनानि ।
एतेषां दक्षिणतः शेषाणामुत्तरे पार्श्वे ॥

मू. (४१) *चउतीसा चोयाला अट्ठतीसं च सयसहस्साइं ।*
वत्ता पन्नासा खलु दाहिणओ हुंति भवणाइं ॥

छा. चतुस्त्रिंशत् चतुश्चत्वारिंशत् अष्टत्रिंशच्च शतसहस्राणि ।
चत्वारिंशत् पञ्चाशत् खलु दक्षिणस्यां भवन्ति भवनानि ॥

मू. (४२) *तीसा चत्तालीसा चउतीसं चेव सयसहस्साइं ।*
छत्तीसा छायाला उत्तरओ हुंति भवणाइं ॥

छा. त्रिंशत् चत्वारिंशत् चतुस्त्रिंशच्चैव शतसहस्राणि ।
षट्त्रिंशत् षट्चत्वारिंशत् उत्तरस्यां भवन्ति भवनानि ॥

मू. (४३) *भवणविमाणवईणं तायत्तीसा य लोगपाला य ।*
सव्वेसिं तिन्नि परिसा समाणचउगुणायरक्खा उ ॥

छा. भवनविमानपतीनां त्रायस्त्रिंशाश्च लोकपालाश्च ।
सर्वेषां तिस्र पर्षदः सामानिकचतुर्गुणा आत्मरक्षाः ॥

मू. (४४) *चउसट्ठी सट्ठी खलु छच्च सहस्सा तहेव चत्तारि ।*
भवणवइवाणमंतरजोइसियाणं च सामाणे ॥

छा. चतुःषष्टि षष्टि खलु षट् च सहस्राणि तथैव चत्वारि ।
भवनपतिव्यन्तरज्योतिष्काणां सामानिकाः ॥

मू. (४५) *पंचग्गमहिसीओ चमरबलीणं हवंति नायव्वा ।*
सेसयभवणिंदाणं छच्चेव य अग्गमहिसीओ ॥

छा. पञ्चाग्रमहिष्यश्चमरबलिनोः भवन्ति ज्ञातव्याः ।
शेषभवनेन्द्राणां षट् चैव चाग्रमहिष्यः ॥

मू. (४६) *दो चेव जंबुदीवे चत्तारि य माणुसुत्तरे सेले ।*
छव्वारुणे समुद्दे अट्ठ य अरुणम्मि दीवम्मि ॥

छा. द्वावेव जम्बूद्वीपे चत्वारश्च मानुषोत्तरे शैले ।
षड् वारुणे समुद्रे अष्टौ चारुणे द्वीपे ॥

मू. (४७) *जंनामए समुद्दे दीवे वा जंमि हुंति आवासा ।*
तन्नामए समुद्दे दीवे वा तेसि उप्पाया ॥

छा. यन्नामके समुद्रे द्वीपे वा यस्मिन् भवन्त्यावासाः ।
तन्नामके द्वीपे समुद्रे वा तेषामुत्पातपर्वताः ॥

मू. (४८) *असुराणं नागाणं उदहिकुमाराण हुंति आवासा ।*
वरुणवरे दीवम्मी तत्थेव य तेसि उप्पाया ॥

छा. असुराणां नागानामुदधिकुमाराणां भवन्त्यावासाः ।
वरुणवरे द्वीपे तत्रैव च तेषामुत्पाताः ॥

मू. (४९) *दीवदिसाअग्गीणं थणियकुमाराण हुंति आवासा ।*
अरुणवरे दीवम्मि य तत्थेव य तेसि उप्पाया ॥

छा. द्वीपदिगग्नीनां स्तनितकुमाराणां भवन्त्यावासाः ।
अरुणवरे द्वीपे तत्रैव च तेषामुत्पातपर्वताः ॥

मू. (५०) *वाउसुवण्णिंदाणं एएसिं माणुसुत्तरे सेले ।*
हरिणो हरिप्पहस्स य विज्जुप्पभमालवंतेसु ॥

छा. वायुसुपर्णेन्द्राणामेतेषां मानुषोत्तरे शैले ।
हरेर्हरिप्रभस्य च विद्युत्प्रभमाल्यवतोः ॥

मू. (५१) *एएसिं देवाणं बलवीरियपरक्कमो अ जो जस्स ।*
ते सुंदरि ! वण्णेहं अहक्कमं आनुपुव्वीए ॥

छा. एतेषां देवानां बलवीर्यपराक्रमश्च यो यस्य ।
तं सुन्दरि ! वर्णयिऽहं यथाक्रममानुपूर्व्या ॥

मू. (५२) *जाव य जंबुद्दीवो जाव य चमरस्स चमरचंचा उ ।*
असुरेहिं असुरकन्नाहिं तस्स विसओ भरेउं जे ॥

छा. यावच्च जम्बूद्वीपो यावच्च चमरस्य चमरचञ्चा ।
असुरैरसुरकन्याभिर्मर्त्तुं तस्य विषयः ॥

मू. (५३) *तं चेव समइरेगं बलिस्स वइरोयणस्स बोद्धव्वं ।*
असुरेहिं असुरकन्नाहिं तस्स विसओ भरेउं जे ॥

छा. स एव समतिरेको बलेर्वैरोचनस्य बोद्धव्यः ।
असुरैरसुरकन्याभिर्मर्त्तुं तस्य विषयः ॥

मू. (५४) *धरणोवि नागराया जंबुद्दीवं फडाइ छाइज्ज ।*
तं चेव समइरेगं भूयानंदे य बोद्धव्वं ॥

छा. धरणोऽपि नागराजो जम्बूद्वीपं फणेनाच्छादयेत् ।
तमेव समतिरेकं भूतानन्दे च बोद्धव्यः ॥

मू. (५५) *गरुलोऽवि वेणुदेवो जंबुद्दीवं छइज्ज पक्खेणं ।*
तं चेव समइरेगं वेणुदालिम्मि बोद्धव्वं ॥

छा. गरुडोऽपि वेणुदेवो जम्बूद्वीपमाच्छादयेत् पक्षेण ।
तमेव समतिरेकं वेणुदालौ बोद्धव्यः ॥

मू. (५६) *पुण्णोवि जंबुदीवं पाणितलेणं छइज्ज इक्केणं ।*
तं चेव समइरेगं हवइ वसिट्ठेवि बोद्धव्वं ॥

छा. पूर्णोऽपि जम्बूद्वीपं पाणितलेनाच्छादयेदेकेन ।
तमेव समतिरेकं भवति वशिष्टेऽपि बोद्धव्यः ॥

मू. (५७) *इक्काइ जलुम्मीए जंबुद्दीवं भरिज्ज जलकंतो ।*
तं चेव समइरेगं जलप्पभे होइ बोद्धव्वं ॥

छा. एकया जलोर्म्या जम्बूद्वीपं भरेज्जलकान्तः ।
तमेव समतिरेकं जलप्रभे भवति बोद्धव्यः ॥

मू. (५८) *अमियगइस्सवि विसओ जंबुद्दीवं तु पायपण्हीए ।*
कंपिज्ज निरवसेसं इयरो पुण तं समइरेगं ॥

छा. अमितगतेरपि विषयो जम्बूद्वीपं तु पादपार्ष्णिना ।
कम्पयेन्निरवशेषमितरः पुनस्तं समतिरेकम् ॥

मू. (५९) *इक्काइ वायुगुंजाइ जंबुद्दीवं भरिज्ज वेलंबो ।*
तं चेव समइरेगं पभंजणे होइ बोद्धव्वं ॥

छा. एकया वातगुञ्जया जम्बूद्वीपं भरेद्वेलम्बः ।
तमेव समतिरेकं प्रभञ्जने भवति बोद्धव्यः ॥

मू. (६०) *घोसोऽवि जंबुदीवं सुंदरि ! इक्केण थणियसद्देणं ।*
बहिरीकरिज्ज सव्वं इयरो पुण तं समइरेगं ॥

छा. घोषोऽपि जम्बूद्वीपं सुन्दरि ! एकेन स्तनितशब्देन ।
बधिरीकुर्यात्सर्वमितरः पुनस्तं समतिरेकम् ॥

मू. (६१) *इक्काइ विज्जुयाए जंबुद्दीवं हरी पकासिज्ज ।*
तं चेव समइरेगं हरिस्सहे होइ बोद्धव्वं ॥

छा. एकया विद्युता जम्बूद्वीपं हरिं प्रकाशयेत् ।
तमेव समतिरेकं हरिसहे भवति बोद्धव्यः ॥

मू. (६२) *इक्काइ अग्गिजालाइ जंबुद्दीवं डहिज्ज अग्गिसिहो ।*
तं चेव समइरेगं माणवए होइ बोद्धव्वं ॥

छा. एकयाऽग्निज्वालया जम्बूद्वीपं दहेदग्निशिखः ।
तमेव समतिरेकं माणवके भवति बोद्धव्यः ॥

मू. (६३) *तिरियं तु असंखिज्जा दीवसमुद्दा सएहिं रूवेहिं ।*
अवगाढाउ करिज्जा सुंदरि ! एएसि एगयरो ॥

छा. तिर्यक् तु असङ्ख्येयान् द्वीपसमुद्रान् स्वकै रूपैः ।
अवगाढान् कुर्यात् सुन्दरि ! एतेषामेकतरः ॥

मू. (६४) *पभू अन्नयरो इंदो जंबुद्दीवं तु वामहत्थेण ।*
छत्तं जहा धरिज्जा अन्नयओ मंदरं घित्तुं ॥

छा. प्रभुरेकतर इन्द्रो जम्बूद्वीपं तु वामहस्तेन ।
छत्रं यथा धर्त्तुमन्यतो मन्दरं ग्रहीतुम् ॥

मू. (६५) *जंबुद्दीवं काऊण छत्तयं मंदरं व से दंडं ।*
पभू अन्नयरो इंदो एसो तेसिं बलविसेसो ॥

छा. जम्बद्वीपं कर्त्तुं छत्रं मन्दरं च तस्य दण्डम् ।
प्रभुरन्यतर इन्द्र एष तेषां बलविशेषः ॥

मू. (६६) *एसा भवणवईणं भवणट्ठिई वन्निया समासेणं ।*
सुण वाणमंतराणं भवणवईआनुपुव्वीए ॥

छा. एषा भवनपतीनां भवनस्थितिर्वर्णिता समासेन ।
श्रृणु व्यन्तराणां भवनपत्यानुपूर्व्या ॥

मू. (६७) *पिसाय भूआ जक्खा य रक्खसा किन्नरा य किंपुरिसा ।*
महोरगा य गंधव्वा अट्ठविहा वाणमंतरिया ॥

छा. पिशाचा भूता यक्षाश्च राक्षसाः किन्नराश्च किंपुरुषाः ।
महोरगाश्च गान्धर्वा अष्टविधा व्यन्तराः ॥

मू. (६८) *एए उ समासेणं कहिया भे वाणमंतरा देवा ।*
पत्तेयंपि य वुच्छं सोलस इंदे महिड्ढीए ॥

छा. एते तु समासेन कथिता भवत्या व्यन्तरा देवाः ।
प्रत्येकमपि च वक्ष्ये षोडशेन्द्रान् महर्धिकान् ॥

मू. (६९) *काले य महाकाले सुरूव पडिरूव पुन्नभद्दे य ।*
अमरवइ माणभद्दे भीमे य तहा महाभीमे ॥

छा. कालश्च महाकालः सुरूपः प्रतिरूपः पूर्णभद्रश्च ।
अमरतिर्माणिभद्रो भीमश्च तथा महाभीमः ॥

मू. (७०) *किन्नरकिंपुरिसे खलु सप्पुरिसे खलु तहा महापुरिसे ।*
अइकायमहाकाए गीयरई चेव गीयजसे ॥

छा. किन्नरः किंपुरुषः खलु सत्पुरुषः खलु तथा महापुरुषः ।
अतिकायो महाकायो गीतरतिश्चैव गीतयशाः ॥

मू. (७१) *सन्निहिए सामाणे धाइ विधाए रिसी य इसिपाले ।*
ईसर महिस्सरे या हवइ सुवच्छे विसाले य ॥

छा. सन्निहितः सामानो धाता विधाता ऋषि ऋषिपालः ।
ईश्वरो महेश्वरश्च भवति सुवत्सो विशालश्च ॥

मू. (७२) *हासे हासरईविअ सेए अ तहा भवे महासेए ।*
पयए पयपावईविय नेयव्वा आनुपुव्वीइ ॥

छा. हासो हासरतिरपि च श्वेतश्च तथा भवति महाश्वेतः ।
पतङ्गश्च पतङ्गपतिरपि च ज्ञातव्या आनुपूर्व्या ॥

मू. (७३) *उड्ढमहे तिरियंमि य वसहिं ओविंति वंतरा देवा ।*
भवणा पुणण्ह रयणप्पभाइ उवरिल्लए कंडे ॥

छा. ऊर्ध्वमधस्तिरश्चि च वसतिमुपयन्ति व्यन्तरा देवाः ।
भवनानि पुनरेषां रत्नप्रभाया उपरितने काण्डे ॥

मू. (७४) *इक्किक्कम्मि य जुयले नियमा भवणा वरा असंखिज्जा ।*
संखिज्जवित्थडा पुण नवरं एतत्थ नाणत्तं ॥

छा. एकैकस्मिंश्च युगले नियमाद्भवनानि वराण्यसङ्ख्येयानि ।
सङ्ख्यातविस्तृतानि पुनः परमत्र नानात्वम् ॥

मू. (७५) *जंबुद्दीवसमा खलु उक्कोसेणं भवंति भवणवरा ।*
खुड्डा खित्तसमाविअ विदेहसमया य मज्झिमया ।।

छा. जम्बूद्वीपसमानि खलु उत्कृष्टेन भवन्ति भवनवराणि ।
क्षुल्लानि भरतक्षेत्रसमान्यपि च विदेहसमानि च मध्यमानि ।।

मू. (७६) *जहिं देवा वंतरिया वरतरुणीगीयवाइयरवेणं ।*
निच्चसुहिया पमुइया गयंपि कालं न याणंति ।।

छा. यत्र देवा व्यन्तरा वरतरुणीगीतवादित्ररवेण ।
नित्यसुखिताः प्रमुदिता गतमपि कालं न जानन्ति ।।

मू. (७७) *काले सुरूव पुण्णे भीमे तह किन्नरे य सप्पुरिसे ।*
अइकाए गीयरई अट्ठेव य हुंति दाहिणओ ।।

छा. कालः सुरूपः पूर्णो भीमस्तथा किन्नरश्च सत्पुरुषः ।
अतिकायो गीतरति अष्टैव च भवन्ति दक्षिणस्याम् ।।

मू. (७८) *मणिकणगरयणथूभिअजंबूणयवेइयाइं भवणाइं ।*
एएसिं दाहिणओ सेसाणं उत्तरे पासे ।।

छा. मणिकनकरत्नस्तूपिकानि जाम्बूनदवेदिकानि भवनानि ।
एतेषां दक्षिणतः शेषाणामुत्तरे पार्श्वे ।।

मू. (७९) *दस वाससहस्साइं ठिई जहन्ना उ वंतरसुराणं ।*
पलिओवमं तु इक्कं ठिई उ उक्कोसिया तेसिं ।।

छा. दश वर्षसहस्राणि जघन्या स्थितिस्तु व्यन्तरसुराणाम् ।
पल्योपमं त्वेकं स्थितिस्तूत्कृष्टैषाम् ।।

मू. (८०) *एसा वंतरियाणं भवणठिई वन्निया समासेणं ।*
सुण जोइसालयाणं आवासविहिं सुरवराणं ।।

छा. एषा व्यन्तराणां भवनस्थितिर्वर्णिता समासेन ।
शृणु ज्योतिष्काणामावासविधिं सुरवराणाम् ।।

मू. (८१) *चंदा सूरा तारागणा य नक्खत्त गहगण समत्ता ।*
पंचविहा जोइसिया ठिई वियारी य ते गणिया ।।

छा. चन्द्राः सूर्यास्तारकागणश्च नक्षत्राणि ग्रहगणः समस्ताः ।
पञ्चविधा ज्योतिष्काः स्थितिमन्तो विचारिणश्च ते गणिताः ।।

मू. (८२) *अद्धकविट्ठगसंठाणसंठिया फालियामया रम्मा ।*
जोइसियाण विमाणा तिरियंलोए असंखिज्जा ।।

छा. अर्द्धकपित्थसंस्थानसंस्थितानि स्फटिकमयानि रम्याणि ।
ज्योतिष्काणां विमानानि तिर्यग्लोकेऽसङ्ख्यातानि ।।

मू. (८३) *धरणियलाउ समाओ सत्तहिं नउएहिं जोयणसएहिं ।*
हिट्ठिल्लो होइ तलो सूरो पुण अट्ठहिं सएहिं ।।

छा. समाद् धरणितलात्सप्तभिर्नवतैर्योजनशतैः ।
अधस्तनं तलं भवति सूर्य पुनरष्टभिः शतैः ।।

मू. (८४) *अट्ठसए आसीए चंदो तह चेव होइ उवरितले ।*
एगं वसुत्तरसयं बाहल्लं जोइसस्स भवे ।।

छा. अष्टशत्यामशीत्यधिकायां चन्द्रस्तथैव भवत्युपरितले ।
एकं दशोत्तरशतं बाहल्यं ज्योतिषो भवति ।।

मू. (८५) *एगट्ठिभाय काऊण जोअणं तस्स भागछप्पन्नं ।*
चंदपरिमंडलं खलु अडयाला होइ सूरस्स ।।

छा. एकषष्टिभागंकृत्वा योजनं तस्य षट्पञ्चाशद्भागाः ।
चन्द्रपरिमण्डलं खलु अष्टचत्वारिंशद्भवंति सूर्यस्य ।।

मू. (८६) *जहिं देवा जोइसिया वरतरुणीगीयवाइयरवेणं ।*
निच्चसुहिया पमुइया गयंपि कालं न याणंति ।।

छा. यत्र देवा ज्योतिष्का वरतरुणीगीतवादित्ररवेण ।
नित्यसुखिताः प्रमुदिताः गतमपि कालं न जानन्ति ।।

मू. (८७) *छप्पन्नं खलु भागा विच्छिन्नं चंदमंडलं होइ ।*
अडवीसं च कलाओ बाहल्लं तस्स बोद्धव्वं ।।

छा. षट्पञ्चाशत् खलु भागा विस्तीर्णं चन्द्रमण्डलं भवति ।
अष्टविंशतिश्च भागा बाहल्यं तस्य बोद्धव्यम् ।।

मू. (८८) *अडयालीसं भागा विच्छिन्नं सूरमंडलं होइ ।*
चउवीसं च कलाओ बाहल्लं तस्स बोद्धव्वं ।।

छा. अष्टचत्वारिंशद्भागा विस्तीर्णं सूर्यमण्डलं भवति ।
चतुर्विंशतिश्च भागा बाहल्यं तस्य बोद्धव्यम् ।।

मू. (८९) *अद्धजोअणिया उ गहा तस्सद्धं चेव होइ नक्खत्ता ।*
नक्खत्तद्धे तारा तस्सद्धं चेव बाहल्लं ।।

छा. अर्द्धयोजनास्तु ग्रहास्तस्यार्द्धमेव भवति नक्षत्राणाम् ।
नक्षत्रार्द्धं तारकास्तदर्द्धमेव बाहल्यम् ।।

मू. (९०) *जोअणमद्धं ततो गाऊअं पंचधनुसया हुंति ।*
गहनक्खत्तगणाणं तारविमाणाण विक्खंभो ।।

छा. योजनमर्द्धं ततो गव्यूतं पञ्च धनुःशतानि च भवन्ति ।
ग्रहनक्षत्रगणानां ताराविमानानां विष्कम्भः ।।

मू. (९१) *जो जस्सा विक्खंभो तस्सद्धं चेव होइ बाहल्लं ।*
तं विउणं सविसेसं परिरओ होइ बोद्धव्वो ।।

छा. यो यस्य विष्कम्भस्तस्य तदर्द्धमेव भवति बाहल्यम् ।
सविशेषस्त्रिगुणः परिरयो भवति बोद्धव्यः ।।

मू. (९२) *सोलस चेव सहस्सा अट्ठ य वउरो य दुन्नि य सहस्सा ।*
जोइसिआण विमाणा वहंति देवाभिउगाओ ।।

छा. षोडशैव सहस्राणि अष्टौ च चत्वारि च द्वे च सहस्र ।
ज्योतिष्काणां विमानानि आभियोगिका देवा वहन्ति ।।

मू. (९३) *पुरओ वहंति सीहा दाहिणओ कुंजरा महाकाया ।*
पच्छत्थिमेण वसहा तुरगा पुण उत्तरे पासे ।।

छा. पुरतो वहन्ति सिंहा दक्षिणतः कुञ्जरा महाकायाः ।
पश्चिमायां वृषभास्तुरगाः पुनरुत्तरे पार्श्वे ।।

मू. (९४) *चंदेहि उ सिग्घयरा सूरा सूरेहिं तह गहा सिग्घा ।*
नक्खत्ता उ गहेहि य नक्खत्तेहिं तु ताराओ ।।

छा. चन्द्रेभ्यस्तु शीघ्रतराः सूर्या सूर्येभ्यस्तथा ग्रहाः शीघ्राः ।
नक्षत्राणि तु ग्रहेभ्यश्च नक्षत्रेभ्यस्तु तारकाः ।।

मू. (९५) *सव्वप्पगई चंदा तारा पुण हुंति सव्वसिग्घगई ।*
एसो गइविसेसो जोइसियाणं तु देवाणं ।।

छा. सर्वाल्पगतयश्चन्द्रास्तारकाः पुनर्भवन्ति सर्वशीघ्रगतयः ।
एष गतिविशेषो ज्योतिष्काणां तु देवानाम् ।।

मू. (९६) *अप्पिड्ढियाओ तारा नक्खत्ता खलु तओ महिड्ढिए ।*
नक्खत्तेहिं तु गहा गहेहिं सूरा तओ चंदा ।।

छा. अल्पर्द्धिकास्तारका नक्षत्राणि खलु ततो महर्द्धिकतराणि ।
नक्षत्रेभ्यस्तु ग्रहा ग्रहेभ्यः सूर्यास्तेभ्यः चन्द्राः ।।

मू. (९७) *सव्वब्भितरऽभीई मूलो पुण सव्वबाहिरो भमइ ।*
सव्वोवरिं च साई धरणी पुण सव्वहिट्ठिमिया ।।

छा. सर्वाभ्यन्तरेऽभिजिन्मूलः पुनः सर्वबाह्ये भ्राम्यति ।
सर्वोपरिष्टाच्च स्वातिर्भरणि पुनः सर्वाधस्तात् ।।

मू. (९८) *साहा गहनक्खत्ता मज्झेगा हुंति चंदसूराणं ।*
हिट्ठा समं च उप्पिं ताराओ चंदसूराणं ।।

छा. शाखा ग्रहनक्षत्राणि चन्द्रसूर्ययोः काश्चिन्मध्ये ।
अधः समुपरि च तारकाश्चन्द्रसूर्ययोः ।।

मू. (९९) *पंचेव धनुसयाइं जहन्नयं अंतरं तु ताराणं ।*
दो चेव गाउआइं निव्वाघाएण उक्कोसं ।।

छा. पञ्चैव धनुःशतानि जघन्यमन्तरं तु तारकाणाम् ।
द्वे एव गव्यूते निर्व्याघातेनोत्कृष्टम् ।।

मू. (१००) *दोन्नि सए छावट्ठे जहन्नयं अंतरं तु ताराणं ।*
बारस चेव सहस्सा दो बायाला य उक्कोसा ।।

अ. द्वे शते षट्षष्ट्यधिके जघन्यमन्तरं तु तारकयोः ।
द्वादश चैव सहस्राणि द्वे शते द्विचत्वारिंशद्योत्कृष्टतः ॥

मू. (१०१) *एयस्स चंदजोगो सत्तट्ठिं खंडिओ अहोरत्तो ।*
ते हुंति नव मुहुत्ता सत्तावीसं कलाओ अ ॥

अ. एतैश्चन्द्रयोगः सप्तषष्टिखण्डितोऽहोरात्रः ।
ते भवन्ति नव मुहूर्त्ताः सप्तविंशतिश्च भागाः (अभिजिति) ॥

मू. (१०२) *सयभिसया भरणीओ अद्दा अस्सेस साइ जिट्ठा य ।*
एए छन्नक्खत्ता पन्नरसमुहुत्तसंजोगा ॥

छा. शतभिषग् भरणी आर्द्राऽश्लेषा स्वातिर्ज्येष्ठा च ।
एतानि षण्नक्षत्राणि पञ्चदशमुहूर्त्तसंयोगानि ॥

मू. (१०३) *तिन्नेव उत्तराइं पुनव्वसू रोहिणी विसाहा य ।*
एए छन्नक्खत्ता पणयालमुहुत्तसंजोगा ॥

छा. त्रीण्येवोत्तराणि पुनर्वसू रोहिणी विशाखा च ।
एतानि षण्नक्षत्राणि पञ्चचत्वारिंशन्मुहूर्त्तसंयोगानि ॥

मू. (१०४) *अवसेसा नक्खत्ता पनरसया हुंति तीसइमुहुत्ता ।*
चंदंमि एस जोगो नक्खत्ताणं मुणेयव्वो ॥

छा. अवशेषाणि नक्षत्राणि पञ्चदश त्रिंशन्मुहूर्त्तसंयोगानि ।
चन्द्रे एष योगो नक्षत्राणां ज्ञातव्यः ॥

मू. (१०५) *अभिई छच्च मुहुत्ते चत्तारि अ केवले अहोरत्ते ।*
सूरेण समं वच्चइ इत्तो सेसाण वुच्छामि ॥

छा. अभिजित् षट् च मुहूर्त्तान् चतुरश्च केवलानहोरात्रान् ।
सूर्येण समं व्रजति अतः शेषाणां वक्ष्ये ॥

मू. (१०६) *सयभिसया भरणीओ अद्दा अस्सेस साइ जिट्ठा य ।*
वच्चंति छऽहोरत्ते इक्कवीसं मुहुत्ते य ॥

छा. शतभिषग् भरणी आर्द्राऽश्लेषा स्वातिर्ज्येष्ठा ।
व्रजन्ति षडहोरात्रान् एकविंशतिं मुहूर्त्तान् ॥

मू. (१०७) *तिन्नेव उत्तराइं पुनव्वसू रोहिणी विसाहा य ।*
वच्चंति मुहुत्ते तिन्नि चेव वीसव्वऽहोरत्ते ॥

छा. त्रीण्येवोत्तराणि पुनर्वसू रोहिणी विशाखा च ।
व्रजन्ति त्रीनेव मुहूर्त्तान् विंशतिं चाहोरात्रान् ॥

मू. (१०८) *अवसेसा नक्खत्ता पन्नरसवि सूरसहगया जंति ।*
बारस चेव मुहुत्ते तेरस य समे अहोरत्ते ॥

छा. अवशेषाणि नक्षत्राणि पञ्चदशाऽपि सूर्यसहगतानि यान्ति ।
द्वादशैव मुहूर्त्तान् त्रयोदश च समानहोरात्रान् ॥

सू. (१०९) *दो चंदा दो सूरा नक्खत्ता खलु हवंति छप्पन्ना ।*
छावत्तरं गहसयं जंबुद्दीवे वियारीणं ॥

छा. द्वौ चन्द्रौ द्वौ सूर्यौ नक्षत्राणि खलु भवन्ति षट्पञ्चाशत् ।
षट्सप्तत्यधिकं ग्रहशतं जम्बूद्वीपे विचारि ॥

सू. (११०) *इक्कं च सयसहस्सं तित्तीसं खलु भवे सहस्साइं ।*
नव य सया पन्नासा तारागणकोडिकोडीणं ॥

छा. एकं च शतसहस्रं त्रयस्त्रिंशत्खलु भवन्ति सहस्राणि ।
नव च शतानि पञ्चाशच्च तारागणकोटीकोटयः ॥

सू. (१११) *चत्तारि चेव चंदा चत्तारि य सूरिया लवणजले ।*
बारं नक्खत्तसयं गहाण तिन्नेव बावन्ना ॥

छा. चत्वार एव चन्द्राश्चत्वारश्च सूर्या लवणजले ।
द्वादशं नक्षत्रशतं ग्रहाणां द्विपञ्चाशदधिकानि त्रीणि शतानि ॥

सू. (११२) *दो चेव सयसहस्सा सत्तट्ठिं खलु भवे सहस्साइं ।*
नव य सया लवणजले तारागणकोडिकोडीणं ॥

छा. द्वे एव शतसहस्रे सप्तषष्टिश्च खलु भवन्ति सहस्राणि ।
नव च शतानि लवणजले तारकगणकोटीकोटीनाम् ॥

सू. (११३) *चउवीसं ससिरविणो नक्खत्तसया य तिन्नि छत्तीसा ।*
इक्कं च गहसहस्सं छप्पन्नं धायईसंडे ॥

छा. चतुर्विंशति शशिनो रवयश्च नक्षत्रशतानि च त्रीणि षट्त्रिंशानि ।
एकं च ग्रहसहस्रं षट्पञ्चाशं धातकीखण्डे ॥

सू. (११४) *अट्ठेव सयसहस्सा तिन्नि सहस्सा य सत्त य सया उ ।*
धायईसंडे दीवे तारागणकोडिकोडीणं ॥

छा. अष्टैव शतसहस्राणि त्रीणि सहस्राणि सप्त च शतानि ।
धातकीखण्डे तारगणकोटीकोटीनाम् ॥

सू. (११५) *बायालीसं चंदा बायालीसं च दिनयरा दित्ता ।*
कालोदहिंमि एए चरंति संबद्धलेसाया ॥

छा. द्विचत्वारिंशच्च दिनकरा दीप्ताः ।
कालोदधावेते चरन्ति संबद्धलेश्याकाः ॥

सू. (११६) *नक्खत्तमिगसहस्सं एगमेव छावत्तरिं च सयमन्नं ।*
छच्च सया छन्नउआ महग्गहाण तिन्नि य सहस्सा ॥

छा. नक्षत्राणामेक सहस्रं षट्सप्ततं शतमेकमन्यच्च ।
षट् च शतानि षण्णवतानि महाग्रहाणां त्रीणि च सहस्राणि ॥

सू. (११७) *अट्ठावीसं कालोदहिम्मि बारस य सहस्साइं ।*
नव य सया पन्नासा तारागणकोडिकोडीणं ॥

छा. अष्टाविंशतिर्लक्षाः कालोदधौ द्वादश च सहस्राणि ।
नव च शतानि पञ्चाशच्च तारागणकोटीकोटीनाम् ॥

मू. (११८) *चोयालं चंदसयं चोयालं चेव सूरियाण सयं ।*
पुक्खरवरम्मि एए चरंति संबद्धलेसागा ॥

छा. चतुश्चत्वारिंशं चन्द्रशतं चतुश्चत्वारिंशमेव सूर्याणां शतम् ।
पुष्करवरे एते चरन्ति संबद्धलेश्याकाः ॥

मू. (११९) *चत्तारिं च सहस्सा बत्तीसं चेव हुंति नक्खत्ता ।*
छच्च सया बावत्तर महग्गहा बारस सहस्सा ॥

छा. चत्वारि च सहस्राणि द्वात्रिंशान्येव भवन्ति नक्षत्राणि ।
षट् च शतानि द्वासप्ततानि महाग्रहा द्वादश सहस्राणि ॥

मू. (१२०) *छन्नउइ सयसहस्सा चोयालीसं भवे सहस्साइं ।*
चत्तारी य सयाइं तारागणकोडिकोडीणं ॥

छा. षण्णवति शतसहस्राणि चतुश्चत्वारिंशच्च भवन्ति शतसहस्राणि ।
चत्वारि च शतानि तारागणकोटीकोटीनाम् ॥

मू. (१२१) *बावत्तरिं च चंदा बावत्तरिमेव दिनयरा दित्ता ।*
पुक्खरवरदीवड्ढे चरंति एए पगासिंता ॥

छा. द्वासप्ततिश्च चन्द्रा द्वासप्ततिरेव दिनकरा दीप्ताः ।
पुष्करवरद्वीपार्द्धे चरन्त्येते प्रकाशयन्तः ॥

मू. (१२२) *तिन्नि सया छत्तीसा छच्च सहस्सा महग्गहाणं तु ।*
नक्खत्ताणं तु भवे सोलाणि दुवे सहस्साणि ॥

छा. त्रीणि शतानि षट्त्रिंशानि षट् च सहस्राणि तु महाग्रहाणाम् ।
नक्षत्राणां तु भवतः षोडशे द्वे सहस्रे ॥

मू. (१२३) *अडयालीसं लक्खा बावीसं खलु भवे सहस्साइं ।*
दो अ सय पुक्खरद्धे तारागणकोडिकोडीणं ॥

छा. अष्टचत्वारिंशल्लक्षा द्वाविंशतिश्च खलु भवन्ति सहस्राणि ।
द्वे च शते पुष्करार्द्धे तारकगणकोटीकोटीनाम् ॥

मू. (१२४) *बत्तीसं चंदसयं बत्तीसं चेव सूरियाण सयं ।*
सयलं मणुस्सलोयं चरंति एए पयासिंता ॥

छा. द्वात्रिंशं चन्द्रशतं द्वात्रिंशमेव सूर्याणां शतम् ।
सकलं मनुष्यलोकं चरत्येतत् प्रकाशयत् ॥

मू. (१२५) *इक्कारस य सहस्सा छप्पिय सोला महग्गहसया उ ।*
छच्च सया छन्नउआ नक्खत्ता तिन्नि य सहस्सा ॥

छा. एकादश च सहस्राणि षोडशाधिकानि षट्शतानि महाग्रहाः ।
षट्शतानि षण्णवतानि नक्षत्राणि त्रीणि च सहस्राणि ॥

मू. (१२६) *अट्ठासीइ चत्ताइं सयसहस्साइं मणुयलोगम्मि ।*
सत्त य सयामणूणा तारागणकोडिकोडीणं ॥

छा. चत्वारिंशत्सहस्राधिकानि अष्टाशीति शतसहस्राणि ।
मनुजलोके सप्त च शतानि अन्यूनानि तारागणकोटीकोटीनाम् ॥

मू. (१२७) *एसो तारापिंडो सव्वसमासेण मणुयलोगम्मि ।*
बहिया पुण ताराओ जिणेहिं भणिया असंखिज्जा ॥

छा. एष तारापिण्डः सर्वसमासेन मनुजलोके ।
बहिस्तात्पुनस्तारका जिनैर्भणिता असङ्ख्येयाः ॥

मू. (१२८) *एवइयं तारग्गं जं भणियं मणुयलोग(मज्झ)म्मि ।*
चारं कलंबुयापुप्फसंठियं जोइसं चरइ ॥

छा. एतावत्ताराग्रं यद्भणितं मनुजलोकमध्ये ।
कदम्बकपुष्पसंस्थितं ज्योतिश्चारं चरति ॥

मू. (१२९) *रविससिगहनक्खत्ता एवइआ आहिया मणुयलोए ।*
जेसिं नामागोयं न पागया पन्नवेइंति ॥

छा. रविशशिग्रहनक्षत्राण्येतावन्त्याख्यातानि मनुजलोके ।
येषां नामगोत्रं न प्राकृताः प्रज्ञापयन्ति ॥

मू. (१३०) *छावट्ठिं पिडयाइं चंदाइच्चाण मणुयलोगम्मि ।*
दो चंदा दो सूरा य हुंति इक्किक्कए पिडये ॥

छा. षट्षष्टिः पिटकानि चन्द्रादित्ययोर्मनुजलोके ।
द्वौ चन्द्रौ द्वौ सूर्यौ च भवन्त्येकैकस्मिन् पिटके ॥

मू. (१३१) *छावट्ठिं पिडयाइं नक्खत्ताणं तु मणुयलोगम्मि ।*
छप्पन्नं नक्खत्ता य हुंति इक्किक्कए पिडए ॥

छा. षट्षष्टिः पिटकानि नक्षत्राणां तु मनुजलोके ।
षट्पञ्चाशन्नक्षत्राणि च भवन्त्येकैकस्मिन् पिटके ॥

मू. (१३२) *छावट्ठी पिडयाणं महग्गहाणं तु मणुयलोगम्मि ।*
छावत्तरं गहसयं च होइ इक्किक्कए पिडए ॥

छा. षट्षष्टिः पिटकानि महाग्रहाणां तु मनुजलोके ।
षट्सप्तत्यधिकं ग्रहशतं च भवत्येकैकस्मिन् पिटके ॥

मू. (१३३) *चत्तारि य पंतीओ चंदाइच्चाण मणुयलोगम्मि ।*
छावट्ठिं छावट्ठिं होइ इक्किक्कया पंती ॥

छा. चतस्रश्च पङ्क्त्यश्चन्द्रादित्यानां मनुजलोके ।
षट्षष्टिः षट्षष्टिर्भवन्त्येकैकस्यां पङ्क्तौ ॥

मू. (१३४) *छप्पन्नं पंतीणं नक्खत्ताणं तु मणुयलोगम्मि ।*
छावट्ठिं छावट्ठिं च होइ इक्किक्कया पंती ॥

छा. षट्पञ्चाशत् पङ्क्त्यो नक्षत्राणां तु मनुजलोके।
षट्षष्टिः २ भवन्त्येकैकस्यां पङ्क्तौ ॥

मू. (१३५) *छावत्तरं गहाणं पंतिसयं होइ मणुय लोगम्मि।*
छावट्ठिं छावट्ठिं च होइ इक्किक्कया पंती ॥

छा. षट्सप्ततं ग्रहाणां पङ्क्तिशतं भवति मनुजलोके।
षट्षष्टिः २ भवन्त्येकैकस्यां पङ्क्तौ ॥

मू. (१३६) *ते मेरुमाणुसुत्तर पयाहिणावत्तमंडला सव्वे।*
अणवट्ठिएहिं जोएहिं चंदा सूरा गहगणा य ॥

छा. ते मेरुमानुषोत्तरयोः प्रदक्षिणावर्त्तमण्डलाः सर्वे।
अनवस्थितैर्योगैश्चन्द्राः सूर्या ग्रहगणाश्च ॥

मू. (१३७) *नक्खत्ततारयाणं अवट्ठिया मंडला मुणेयव्वा।*
तेवि य पयाहिणावत्तमेव मेरुं अणुचरंति ॥

छा. नक्षत्रतारकाणामवस्थितानि मण्डलानि ज्ञातव्यानि।
तेऽपि च प्रदक्षिणावर्त्तमेव मेरुमनुचरन्ति ॥

मू. (१३८) *रयणियरदिनयराणं उड्ढमहे एव संकमो नत्थि।*
मंडलसंकमणं पुण अब्भिंतरबाहिरं तिरियं ॥

छा. रजनीकरदिनकराणामूर्द्धमधश्च सङ्क्रमो नास्ति।
मण्डलसङ्क्रमणं पुनरभ्यन्तरबाह्येषु तिरश्चि ॥

मू. (१३९) *रयणियरदिनयराणं नक्खत्ताणं च महग्गहाणं च।*
चारविसेसेण भवे सुहदुक्खविही मणुस्साणं ॥

छा. रजनीकरदिनकराणां नक्षत्राणां महाग्रहाणां च।
चारविशेषेण भवति सुखदुःखविधिर्मनुष्याणाम् ॥

मू. (१४०) *तेसिं पविसंताणं तावक्खित्ते उ वड्ढए नियमा।*
तेणेव कमेण पुणो परिहायइ निक्खमिन्ताणं ॥

छा. तेषु प्रविशत्सु तापक्षेत्रं तु वर्द्धते नियमात्।
तेनैव क्रमेण पुनः परिहीयते निष्क्रामत्सु ॥

मू. (१४१) *तेसिं कलंबुयापुप्फसंठिया हुंति तावखित्तमुहा।*
अंतो अ संकुला बाहिं च वित्थडा चंदसूराणं ॥

छा. तेषां कदम्बकपुष्पसंस्थितानि भवन्ति तापक्षेत्रमुखानि।
अन्तश्च सङ्कटानि विहिश्च विस्तृतानि चन्द्रसूर्याणाम् ॥

मू. (१४२) *केणं वड्ढइ चंदो ? परिहाणी केण होइ चंदस्स ?।*
कालो वा जुण्हा वा केणऽणुभावेण चंदस्स ॥

छा. केन चन्द्रो वर्द्धते ? परिहाणि केन भवति चन्द्रस्य।
कालिमा वा ज्योत्स्ना वा केनानुभावेन चन्द्रस्य ॥

मू. (१४३) *किण्हं राहुविमाणं निच्चं चंदेण होइ अविरहियं ।*
चउरंगुलमप्पत्तं हिट्ठा चंदस्स तं चरइ ॥

छा. कृष्णं राहुविमानं नित्यं चन्द्रेण भवत्यविरहितम् ।
चतुरङ्गुलान्यप्राप्तमधस्ताच्चन्द्रस्य तच्चरति ॥

मू. (१४४) *छावट्ठिं छावट्ठिं दिवसे दिवसे उ सुक्कपक्खस्स ।*
जं परिवड्ढइ चंदो खवेइ तं चेव कालेणं ॥

छा. षट्षष्टिं षट्षष्टिं (भागं) दिवसे दिवसे तु शुक्लपक्षस्य ।
यत्परिवर्द्धयति चन्द्रं क्षपयति तावन्तमेव कृष्णस्य ॥

मू. (१४५) *पन्नरसइ भागेण य चंदं पन्नरसमेव वंकमइ ।*
पन्नरसइभागेण य पुणोवि तं चेव पक्कमइ ॥

छा. पञ्चदशभागेन च चन्द्रस्य पञ्चदशभागमेवाक्रामति ।
पञ्चदशभागेन च पुनरपि तत एव प्रक्राम्यति ॥

मू. (१४६) *एवं वड्ढइ चंदो परिहाणी एव होइ चंदस्स ।*
कालो वा जुण्हा वा तेण य (ऽणु) भावेण चंदस्स ॥

छा. एवं वर्द्धते चन्द्रः परिहाणिरेव भवति चन्द्रस्य ।
कालिमा वा ज्योत्स्ना वा तेन च भावेन चन्द्रस्य ॥

मू. (१४७) *अंतो मणुस्सखेत्ते हवंति चारोवगा य उववण्णा ।*
पंचविहा जोइसिया चंदा सूरा गहगणा य ॥

छा. अन्तर्मनुष्यक्षेत्रे भवन्ति चारोपगाश्चो (श्चारो) पपन्नाः ।
पंचविधा ज्योतिषिकाः, चंद्राः सूर्या ग्रहगणाश्च ॥

मू. (१४८) *तेण परं जे सेसा चंदाइच्च गहतारनक्खत्ता ।*
नत्थि गई नवि चारो उवट्ठिया ते मुणेयव्वा ॥

छा. ततः परं ये शेषाश्चन्द्रादितया ग्रहास्तारका नक्षत्राणि ।
नास्ति गतिर्नैव चारः अवस्थितास्ते ज्ञातव्याः ॥

मू. (१४९) *दो चंदा इह दीवे चत्तारि य सागरे लवणतोए ।*
धायइसंडे दीवे बारस चंदा य सूरा य ॥

छा. द्वौ चन्द्राविह द्वीपे चत्वारश्च सागरे लवणतोये ।
धातकीखण्डे द्वीपे द्वादश चन्द्राश्च सूर्याश्च ॥

मू. (१५०) *एगे जंबुद्दीवे दुगुणा लवणे चउग्गुणा हुंति ।*
कालोयए तिगुणिया ससिसूरा धायईसंडे ॥

छा. एको जम्बूद्वीपे द्विगुणा लवणे चतुर्गुणा भवन्ति ।
कालोदे त्रिगुणिताः शशिसूर्या धातकीखण्डे ॥

मू. (१५१) *धायइसंडप्पभिई उद्दिट्ठा तिगुणिया भवे चंदा ।*
आइल्लचंदसहिया अनंतरानंतरे खित्ते ॥

छा. धातकीखण्डात् प्रभृति उद्दिष्टास्त्रिगुणिता भवेयुश्चन्द्राः ।
आदिमचन्द्रसहिता अनन्तरानन्तरे क्षेत्रे ॥

मू. (१५२) *रिक्खग्गहतारग्गा दीवसमुद्दाण इच्छसे नाउं ।*
तस्स ससीहि उ गुणियं रिक्खग्गहतारयग्गं तु ॥

छा. ऋक्षग्रहतारकाग्राणि द्वीपसमुद्रयोरिच्छसि ज्ञातुं ।
तस्य शशिभिर्गुणितं ऋक्षग्रहतारकाग्रं तु ॥

मू. (१५३) *बहिया उ माणुसनगस्स थंदसूराणऽवट्ठिया जोगा ।*
चंदा अभीइजुत्ता सूरा पुण हुंति पुस्सेहिं ॥

छा. [illegible] पुनर्मानुषोत्तरनगात् चन्द्रादित्योरवस्थिता योगः ।
चन्द्रा अभिजिता युक्ताः सूर्या पुनर्भवन्ति पुष्यैः ॥

मू. (१५४) *चंदाओ सूरस्स य सूरा ससिणो य अंतरं होइ ।*
पन्नाससहस्साइं जोयणाणं अणूणाइं ॥

छा. चन्द्रात् सूर्यस्य सूर्यात् शशिनश्चान्तरं भवंति ।
पंचाशत् सहस्राणि योजनानामनूनानि ॥

मू. (१५५) *सूरस्स य सूरस्स य ससिणो ससिणो य अंतरं होइ ।*
बहिया उ माणुसनगस्स जोअणाणं सयसहस्सं ॥

छा. सूर्यस्य सूर्यस्य च शशिनः शशिनश्चान्तरं भवति ।
बहिस्तात् मानुषनगात् योजनानां शतसहस्रं ॥

मू. (१५६) *सूरंतरिया चदा चंदंतरिया उ दिनयरा दित्ता ।*
चित्तंतरलेसागा सुहलेसा मंदलेसा य ॥

छा. सूर्यान्तरिताश्चन्द्राः चन्द्रान्तरिताश्च दिनकरा दीप्ताः ।
चित्रान्तरलेश्याकाः शुभलेश्या मन्दलेश्याश्च ॥

मू. (१५७) *अट्ठासीयं च गहा अट्ठावीसं च हुंति नक्खत्ता ।*
एगससीपरिवारो एत्तो ताराण वुच्छामि ॥

छा. अष्टाशीतिश्च ग्रहाः अष्टाविंशतिश्च भवन्ति नक्षत्राणि ।
एकशशिपरीवारः इतस्तारकाणां वक्ष्ये ॥

मू. (१५८) *छावट्ठि सहस्साइं नव चेव सयाइं पंचसयराइं ।*
एगससी परिवारो तारागणकोडिकोडीणं ॥

छा. षट्षष्टिः सहस्राणि नव चैव शतानि पंचसप्तानि ।
एकशशिपरीवारस्तारकगणकोटीकोटीनां ॥

मू. (१५९) *वाससहस्सं पलिओवमं च सूराण सा ठिई भणिया ।*
पलिओवम चंदाणं वाससयसहस्समब्भहियं ॥

छा. वर्षसहस्रं पल्योपमं च सूर्याणां सा स्थितिर्भणिता ।
पल्योपमं चन्द्राणां वर्षशतसहस्राभ्यधिकम् ॥

मू. (१६०) *पलिओवमं गहाणं नक्खत्ताणं व जाण पलियद्धं ।*
पलियचउत्थो भाओ ताराणवि सा ठिई भणिया ॥

छा. पल्योपमं ग्रहाणां नक्षत्राणां च जानीहि पल्योपमार्धं ।
पल्यचतुर्थो भागस्तारकाणां सा स्थितिर्भणिता ॥

मू. (१६१) *पलिओवमट्ठभागो ठिई जहन्ना उ जोइसगणस्स ।*
पलिओवममुक्कोसं वाससयसहस्समब्भहियं ॥

छा. पल्योपमाष्टभागः स्थितिर्जघन्या तु ज्योतिष्कगणस्य ।
पल्योपममुत्कृष्टं वर्षशतसहस्राभ्यधिकं ॥

मू. (१६२) *भवणवइवाणमंतरजोइसवासी ठिई मए कहिया ।*
कप्पवईवि य वुच्छं बारस इंदे महिड्ढीए ॥

छा. भवनपतिव्यन्तरज्योतिष्कवासिनां स्थितिर्मया कथिता ।
कल्पपतीनपि वक्ष्ये द्वादशेन्द्रान् महर्द्धिकान् ॥

मू. (१६३) *पढमो सोहम्मवई ईसाणवई उ बीयए बीओ ।*
तत्तो सणंकुमारो हवइ चउत्थो उ माहिंदो ॥

छा. प्रथमः सौधर्मपतिरीशानपतिस्तु भण्यते द्वितीयः ।
ततः सनत्कुमारो भवति चतुर्थस्तु माहेन्द्रः ॥

मू. (१६४) *पंचमए पुण बंभो छट्ठो पुण लंतओऽत्थ देविंदो ।*
सत्तमओ महसुक्को अट्ठमओ भवे सहस्सारो ॥

छा. पंचमकः पुनर्ब्रह्मा षष्ठः पुनर्लान्तकोऽत्र देवेन्द्रः ।
सप्तमस्तु महाशुक्रोऽष्टमो भवेत्सहस्रारः ॥

मू. (१६५) *नवमो अ आणइंदो दसमो उण पाणउऽत्थ देविंदो ।*
आरण इक्कारसमो बारसमो अच्चुए इंदो ॥

छा. नवमश्चानतेन्द्रो दशमः पुनः पराणतोऽत् देवेन्द्रः ।
आरण एकादशो द्वादशोऽच्युत इन्द्रः ॥

मू. (१६६) *एए बारस इंदा कप्पवई कप्पसामिया भणिया ।*
आणाईसरियं वा तेण परं नत्थि देवाणं ॥

छा. एते द्वादश इन्द्राः कल्पपतयः कल्पस्वामिनो भणिताः ।
आज्ञा ऐश्वर्यं वा ततः परं नास्ति देवानां ॥

मू. (१६७) *तेण परं देवगणा सयइच्छियभावणाइ उववन्ना ।*
गेविज्जेहिं न सक्को उववाओ अन्नलिंगेणं ॥

छा. ततः परं देवगणाः स्वकेप्सितभावनायामुत्पन्नाः ।
ग्रैवेयकेषु न शक्योऽन्यलिंगेनोपपातः ॥

मू. (१६८) *जे दंसणवावन्ना लिंगग्गहणं करंति सामण्णे ।*
तेसिंपिय उववाओ उक्कोसो जाव गेविज्जा ॥

छा. ये व्यापन्नदर्शना लिंगग्रहणं कुर्वन्ति श्रामण्ये ।
तेषामपि चोपपात उत्कृष्टो यावद् ग्रैवेयके ॥

मू. (१६९) *इत्थ किर विमाणाणं बत्तीसं वण्णिया सयसहस्सा ।*
सोहम्मकप्पवइणो सक्कस्स महानुभागस्स ॥

छा. अत्र किल विमानानां द्वात्रिंशद्वर्णितानि शतसहस्राणि ।
सौधर्मकल्पपतेः शक्रस्य महानुभागस्य ॥

मू. (१७०) *ईसाणकप्पवइणो अट्ठावीसं भवे सयसहस्सा ।*
बारस्स सयसहस्सा कप्पम्मि सणंकुमारम्मि ॥

छा. ईशानकल्पपतेरष्टाविंशतिर्भवन्ति शतसहस्राणि ।
द्वादश शतसहस्राणि कल्पे सनत्कुमारे ॥

मू. (१७१) *अट्ठेव सयसहस्सा माहिंदंमि उ भवंति कप्पम्मि ।*
चत्तारि सयसहस्सा कप्पम्मि उ बंभलोगम्मि ॥

छा. अष्टैव शतसहस्राणि माहेन्द्रे तु भवन्ति कल्पे ।
चत्वारि शतसहस्राणि कल्पे तु ब्रह्मलोके ॥

मू. (१७२) *इत्थ किर विमाणाणं पन्नासं लंतए सहस्साइं ।*
चत्तारि महासुक्के छच्च सहस्सा सहस्सारे ॥

छा. अत्र किल विमानानां पंचाशत् लान्तके सहस्राणि ।
चत्वारिंशत् महाशुक्रे षट् च सहस्राणि सहस्रारे ॥

मू. (१७३) *आणयपाणयकप्पे चत्तारि सया ऽऽरणच्चुए तिन्नि ।*
सत्त विमाणसयाइं चउसुवि एएसु कप्पेसु ॥

छा. आनतप्राणतकल्पयोश्चत्वारि शतानि आरणाच्युतयोस्त्रीणि ।
सप्तविमानशतानि चतुर्ष्वपि एतेषु कल्पेषु ॥

मू. (१७४) *एयाइ विमाणाइं कहियाइं जाइं जत्थ कप्पम्मि ।*
कप्पवईणवि सुंदरि ! ठिईविसेसे निसामेहि ॥

छा. एतानि विमानानि कथितानि यानि यत्र कल्पे ।
कल्पपतीनामपि सुन्दरि ! स्थितिविशेषान् निशमय ॥

मू. (१७५) *दो सागरोवमाइं सक्कस्स ठिई महानुभागस्स ।*
साहीया ईसाणे सत्तेव सणंकुमारम्मि ॥

छा. द्वे सागरोपमे शक्रस्य स्थितिर्महानुभागस्य ।
साधिके ईशाने सप्तैव सनत्कुमारे ॥

मू. (१७६) *माहिंदे साहियाइं सत्त दस चेव बंभलोगम्मि ।*
चउदस लंतइ कप्पे सत्तरस भवे महासुक्के ॥

छा. माहेन्द्रे साधिकानि सप्त दशैव ब्रह्मलोके ।
चतुर्दश लान्तके कल्पे सप्तदश भवन्ति महाशुक्रे ॥

मू. (१७७) *कप्पम्मि सहस्सारे अट्ठारस सागरोवमाइं ठिई ।*
एगूणाऽऽणयकप्पे वीसा पुण पाणए कप्पे ॥

छा. कल्पे सहस्रारे अष्टादश सागरोपमाणि स्थिति ।
एकोनविंशतिरानतकल्पे विंशति पुनः प्राणतकल्पे ॥

मू. (१७८) *पुण्णा य इक्कवीसा उदहिसनामाण आरणे कप्पे ।*
अह अच्चुयम्मि कप्पे बावीसं सागराण ठिई ॥

छा. पूर्णा एकविंशति उदधिसनाम्नां आरणे कल्पे ।
अथाच्युते कल्पे द्वाविंशति सागरोपमाणां स्थिति ॥

मू. (१७९) *एसा कप्पवईणं कप्पठिई वण्णिया समासेणं ।*
गेविज्जऽनुत्तराणं सुण अनुभागं विमाणाणं ॥

छा. एषा कल्पपतीनां कल्पस्थितिर्वर्णिता समासेन ।
ग्रैवेयकानुत्तराणां शृ णु अनुभागं विमानानां ॥

मू. (१८०) *तिन्नेव य गेविज्जा हिट्ठिल्ला मज्झिमा य उवरिल्ला ।*
इक्किक्कंपि य तिविहं नव एवं हुंति गेविज्जा ॥

छा. त्रीण्येव ग्रैवेयकाणि अधस्तनानि मध्यमान्युपरितनानि च ।
एकैकस्मिंश्च त्रिविधानि नवैवं भवन्ति ग्रैवेयकाणि ॥

मू. (१८१) *सुदंसणा अमोहा य, सुप्पबुद्धा जसोधरा ।*
वच्छा सुवच्छा सुमणा, सोमनसा पियदंसणा ॥

छा. सुदर्शनः अमोधः सुप्रबुद्धो यशोधरः ।
वक्षाः सुवक्षाः सुमनाः सौमनसः प्रियदर्शनः ॥

मू. (१८२) *एक्कारसुत्तरं हेट्ठिमेण सत्तुत्तरं च मज्झिमए ।*
सयमेगं उवरिमए पंचेव अनुत्तरविमाणा ॥

छा. अधस्तने एकादशोत्तरं शतं सप्तोत्तरं शतं च मध्ये ।
शतमेकं उपरितने पंचैवानुत्तरविमानानि ॥

मू. (१८३) *हेट्ठिमगेविज्जाणं तेवीसं सागरोवमाइं ठिई ।*
इक्किक्कमाउहिज्जा अट्ठहिं सेसेहिं नमियंगी ॥

छा. अधस्तनाधस्तनग्रैवेयकानां त्रयोविंशति सागरोपमाणि स्थिति ।
एकैकं वर्धयेत् अष्टसु शेषेषु नमितांगि ॥

मू. (१८४) *विजयं च वेजयंतं जयंतमपराजियं च बोद्धव्वं ।*
सव्वट्ठसिद्धनामं होइ चउण्हं तु मज्झिमयं ॥

छा. विजयं च वैजयंतं जयन्तमपराजितं च बोद्धव्यं ।
सर्वार्थसिद्धनाम भवति चतुर्णां तु मध्यमं ॥

मू. (१८५) *पुव्वेण होइ विजयं दाहिणओ होइ वेजयंतं तु ।*
अवरेणं तु जयंतं अवराइयमुत्तरे पासे ॥

छा. पूर्वस्यां भवति विजयं दक्षिणतो भवति वैजयंतं तु ।
अपरस्यां तु जयन्तं अपराजितमुत्तरे पार्श्वे ॥

मू. (१८६) *एएसु विमाणेसु उ तित्तीसं सागरोवमाइं ठिई ।*
सव्वट्ठसिद्धनामे अजहन्नुक्कोस तित्तीसा ॥

छा. एतेषु विमानेषु तु त्रयस्त्रिंशत् सागरोपमाणि स्थितिः ।
सर्वार्थसिद्धनाम्नि अजघन्योत्कृष्टा त्रयस्त्रिंशत्सागरोपमाणि ॥

मू. (१८७) *हिट्ठिल्ला उवरिल्ला दो दो जुयलऽद्धचंदसंठाणा ।*
पडिपुण्णचंदसंठाणसंठिया मज्झिमा चउरो ॥

छा. अधस्तने [illegible] द्वे द्वे युगले अर्धचन्द्रसंस्थाने ।
प्रतिपूर्णचन्द्रसंस्थानसंस्थिता मध्यमाश्चत्वारः ॥

मू. (१८८) *गेविज्जाऽऽवलिसरिसा गेविज्जा तिन्नि तिन्नि आसन्ना ।*
हुल्लुयसंठाणाइं अणुत्तराइं विमाणाइं ॥

छा. ग्रैवेयकावलिसदृशानि ग्रैवेयकाणि त्रीणि त्रीणि आसन्नानि ।
हुल्लुकसंस्थानानि अनुत्तराणि विमानानि ॥

मू. (१८९) *घनउदहिपइट्ठाणा सुरभवणा दोसु हुंति कप्पेसुं ।*
तिसु वाउपइट्ठाणा तदुभयसुपइट्ठिया तिन्नि ॥

छा. धनोदधिप्रतिष्ठानानि सुरभवनानि द्वयोर्भवन्ति कल्पयोः ।
त्रिषु वायुप्रतिष्ठानानि तदुभयसुप्रतिष्ठितान्युपरि त्रिषु ॥

मू. (१९०) *तेण परं उवरिमया आगासंतरपइट्ठिया सव्वे ।*
एस पइट्ठाणविही उड्ढं लोए विमाणाणं ॥

छा. ततः परमुपरितनानि आकाशान्तरप्रतिष्ठितानि सर्वाणि ।
एष प्रतिष्ठानविधि ऊर्ध्वलोके विमानानां ॥

मू. (१९१) *किण्हा नीला काऊ तेऊलेसा य भवणवंतरिया ।*
जोइससोहम्मीसाणं तेउलेसा मुणेयव्वा ॥

छा. कृष्णा नीला कापोती तेजोलेश्या च भवनपतिव्यन्तराणां ।
ज्योतिष्कसौधर्मेशानानां तेजोलेश्या ज्ञातव्या ॥

मू. (१९२) *कप्पे सणंकुमारे माहिंदे चेव बंभलोए य ।*
एएसु पम्हलेसा तेण परं सुक्कलेसा उ ॥

छा. कल्पे सनत्कुमारे माहेन्द्रे चैव ब्रह्मलोके च ।
एतेषु पद्मलेश्या ततः परं शुक्ललेश्या तु ॥

मू. (१९३) *कणगत्तयरत्ताभा सुरवसभा दोसु हुंति कप्पेसु ।*
तिसु हुंति पम्हगोरा तेण परं सुक्किल्ला देवा ॥

छा. कनकत्वग्रक्ताभाः सुरवृषभा भवन्ति द्वयोः कल्पयोः ।
त्रिषु भवन्ति पद्मारक्तास्ततः परं शुक्लशोभाढ्याः देवाः ॥

मू. (१९४) भवणवइवाणमंतरजोइसिया हुंति सत्तरयणीया ।
कप्पवईणऽइसुंदरि ! सुण उच्चत्तं सुरवराणं ॥

छा. भवनपतिव्यन्तरज्योतिष्का भवन्ति सप्तरत्नयः ।
कल्पपतीनां अतिसुन्दरि ! शृणु उच्चत्वं सुरवराणां ॥

मू. (१९५) सोहम्मीसाणसुरा उच्चत्ते हुंति सत्तरयणीया ।
दो दो कप्पा तुल्ला दोसुवि परिहायए रयणी ॥

छा. सौधर्मेशानसुरा उच्चत्वेन भवन्ति सप्त रत्नयः ।
द्वौ द्वौ कल्पौ तुल्यौ द्वयोरपि परिहीयते रत्नि ॥

मू. (१९६) गेविज्जेसु य देवा रयणीओ दुन्नि हुंति उच्चाओ ।
रयणी पुण उच्चत्तं अनुत्तरविमाणवासीणं ॥

छा. ग्रैवेयकेषु देवा द्वे द्वे रत्नी भवन्त्युच्चाः ।
रत्नि पुनरुच्चत्वं अनुत्तरविमानवासिनां ॥

मू. (१९७) कप्पाओ कप्पम्मि उ जस्स ठिई सागरोवमब्भहिया ।
उस्सेहो तस्स भवे इक्कारसभागपरिहीणो ॥

छा. कल्पात् कल्पे तु यस्य स्थिति सागरोपमेणाधिका ।
उत्सेधस्तस्य भवेत् एकादशभागपरिहीणः ॥

मू. (१९८) जो अ विमाणस्सेहो पुढवीणं जं च होइ बाहल्लं ।
दुण्हंपि तं पमाणं बत्तीसं जोयणसयाइं ॥

छा. यश्च विमानानामुत्सेधो बाहल्यं यच्च भवति पृथिव्याः ।
द्वयोरपि तत्प्रमाणं द्वात्रिंशद्योजनशतानि ॥

मू. (१९९) भवणवइवाणमंतरजोइसिया हुंति कायपवियारा ।
कप्पवईणवि सुंदरि ! वुच्छं पवियारणविहीं उ ॥

छा. भवनपतिव्यन्तरज्योतिष्का भवन्ति कायप्रविचाराः ।
कल्पपतीनामपि सुंदरि ! वक्ष्ये परिचारणाविधिं ॥

मू. (२००) सोहम्मीसाणेसुं सुरवरा हुंति कायपवियारा ।
सणंकुमारमाहिंदेसु फासपवियारया देवा ॥

छा. सौधर्मेशानयोः सुरवरा भवन्ति कायप्रवीचाराः ।
सनत्कुमारमाहेन्द्रयोः स्पर्शप्रविचारका देवाः ॥

मू. (२०१) बंभे लंतयकप्पे सुरवरा हुंति रूवपवियारा ।
महसुक्कसहस्सारे सद्दपवियारया देवा ॥

छा. ब्रह्मदेवलोके लांतके कल्पे सुरवरा भवन्ति रूपप्रवीचाराः ।
महाशुक्रसहस्रारयोः शब्दप्रवीचारका देवाः ॥

मू. (२०२) आणयपाणयकप्पे आरण तह अच्चुए सुकप्पम्मि ।
देवा मनपवियारा तेण परं चूअपवियारा ॥

छा. आनतप्राणतकल्पयोरारणे तथा अच्युते सुकल्पे ।
देवा मनःप्रवीचाराः ततः परं च्युतप्रवीचाराः ॥

मू. (२०३) गोसीसागुरुकेयइपत्तपुन्नागबउलगंधा य ।
चंपयकुवलयगंधा तगरेलसुगंधगंधाय ॥

छा. गोशीर्षागुरुकेतकीपुत्रपुन्नागबकुलगन्धाश्च ।
चम्पककुवलयगन्धाः तगरैलासुगन्धिगन्धाश्च ॥

मू. (२०४) एसा णं गंधविही उवमाए वण्णिया समासेणं ।
दिट्ठीएवि य तिविहा थिरसुकुमारा य फासेणं ॥

छा. एष गन्धविधिरुपमया वर्णितः समासेन ।
दृष्ट्याऽपि च त्रि(वि)विधाः स्थिरसुकुमाराश्च स्पर्शेन ॥

मू. (२०५) तेवीसं च विमाणा चउरासीइं च सयसहस्साइं ।
सत्तानउई सहस्साइं उड्ढलोए विमाणाणं ॥

छा. त्रयोविंशतिश्च विमानानि चतुरशीतिश्च शतसहस्राणि ।
सप्तनवति सहस्राणि ऊर्ध्वलोके विमानानां ॥

मू. (२०६) अउणानउई सहस्सा चउरासीइं च सयसहस्साइं ।
एगूणयं दिवड्ढं सयं च पुप्फावकिण्णाणं ॥

छा. एकोननवति सहस्राणि चतुरशीतिश्च शतसहस्राणि ।
एकोनं चार्धशतं च पुष्पावकीर्णानाम् ॥

मू. (२०७) सत्तेव सहस्साइं सयाइं बावत्तराइं अट्ठ भवे ।
आवलियाइ विमाणा सेसा पुप्फावकिण्णाणं ॥

छा. सप्तैव सहस्राणि द्वासप्ततानि शतानि चाष्ट भवंति ।
आवलिकासु विमानानि शेषाणि पुष्पावकीर्णानि ॥

मू. (२०८) आवलिआइ विमाणाण अंतरं नियमसो असंखिज्जं ।
संखिज्जमसंखिज्जं भणियं पुप्फावकिन्नाणं ॥

छा. आवलिकायां विमानानामन्तरं नियमेनासंख्येयं ।
संख्येयमसंख्येयं भणितं पुष्पावकीर्णानां ॥

मू. (२०९) आवलियाइ विमाणा वट्टा तंसा तहेव चउरंसा ।
पुप्फावकिण्णया पुण अनेगविहरूवसंठाणा ॥

छा. आवलिकायां विमानानि वृत्तानि त्र्यस्राणि चतुरस्राणि तथैव ।
पुष्पावकीर्णानि पुनरनेकविधरूपसंस्थानानि ॥

मू. (२१०) वट्टं खु वलयगंपिव तंसा सिंघाडयंपिव विमाणा ।
चउरंसविमाणा पुण अक्खाडयसंठिया भणिया ॥

छा. वृत्तानि खलु वलयमिव त्र्यस्राणि शृंगाटकमिव विमानानि ।
चतुरस्रविमानानि पुनः अक्षाटकसंस्थितानि भणितानि ॥

मू. (२११) *पढमं वट्टविमाणं बीयं तंसं तहेव चउरंसं ।*
एगंतरचउरंसं पुणोवि वट्टं पुणो तंसं ॥

छा. प्रथमं वृत्तं विमानं द्वितीयं त्र्यस्रं तथैव चतुरस्रं ।
वृत्तात् एकान्तरेण चतुरस्रं पुनरपि वृत्तं पुनस्त्र्यस्रं ॥

मू. (२१२) *वट्टं वट्टस्सुवरिं तंसं तंसस्स उप्परिं होइ ।*
चउरंसे चउरंसं उड्ढं तु विमाणसेढीओ ॥

छा. वृत्तं वृत्तस्योपरि त्र्यस्रं त्र्यस्रस्योपरि भवति ।
चतुरस्रस्य चतुरस्रं ऊर्ध्वं तु विमानश्रेणयः (एवं) ॥

मू. (२१३) *उवलंबयरज्जूओ सव्वविमाणाण हुंति समियाओ ।*
उवरिमचरिमंताओ हिट्ठिल्लो जाव चरिमंतो ॥

छा. अवलम्बनरज्जवः सर्वविमानानां भवन्ति समाः ।
उपरितनचरमान्ताद् यावदधस्तनश्चरमान्तः ॥

मू. (२१४) *पागारपरिक्खित्ता वट्टविमाणा हवंति सव्वेवि ।*
चउरंसविमाणाणं चउद्दिसिं वेइया भणिया ॥

छा. प्राकारपरिक्षिप्तानि वृत्तानि विमानानि भवन्ति सर्वाण्यपि ।
चतुरस्रविमानानां चतसृषु दिक्षु वेदिका भणिता ॥

मू. (२१५) *जत्तो वट्टविमाणं तत्तो तंसस्स वेइया होइ ।*
पागारो बोद्धव्वो अवसेसाणं तु पासाणं ॥

छा. यतो वृत्तविमानं ततस्त्र्यस्रस्य वेदिका भवति ।
प्राकारो बोद्धव्यः अवशेषयोस्तु पार्श्वयोः ॥

मू. (२१६) *जे पुण वट्टविमाणा एगदुवारा हवंति सव्वेवि ।*
तिन्नि य तंसविमाणे चत्तारि य हुंति चउरंसे ॥

छा. यानि पुनर्वृत्तविमानानि एकद्वाराणि भवन्ति सर्वाण्यपि ।
त्रीणि च त्र्यस्रविमाने चत्वारि च भवन्ति चतुरस्रे ॥

मू. (२१७) *सत्तेव य कोडीओ हवंति बावत्तरिं सयसहस्सा ।*
एसो भवणसमासो भोमिज्जाणं सुरवराणं ॥

छा. सप्तैव च कोट्यो भवन्ति द्विसप्तति शतसहस्राणि ।
एष भवनसमासो भौमेयकानां सुरवराणां ॥

मू. (२१८) *तिरिओववाइयाणं रम्मा भोम्मनगरा असंखिज्जा ।*
तत्तो संखिज्जगुणा जोइसियाणं विमाणा उ ॥

छा. तिर्यगुपपातिकानां भौमानि नगराणि असंख्येयानि ।
ततः संख्येयगुणानि ज्योतिष्काणां विमानानि ॥

मू. (२१९) *थोवा विमाणवासी भोमिज्जा वाणमंतरमसंखा ।*
तत्तो संखिज्जगुणा जोइसवासी भवे देवा ॥

छा. स्तोका विमानवासिनो भौमेया व्यन्तरा असंख्येयाः ।
ततः संख्येयगुणा ज्योतिष्कवासिनो भवन्ति देवाः ॥

मू. (२२०) *पत्तेयविमाणाणं देवीणं छब्भवे सयसहस्सा ।*
सोहम्मे कप्पम्मि उ ईसाणे हुंति चत्तारि ॥

छा. प्रत्येकं वैमानिकानां देवीनां षट् भवन्ति शतसहस्राणि ।
सौधर्मे कल्पे तु ईशाने भवन्ति चत्वारि शतसहस्राणि ॥

मू. (२२१) *पंचेवनुत्तराइं अनुत्तरगईहिं जाइं दिट्ठाइं ।*
जत्थ अनुत्तरदेवा भोगसुहमनुवमं पत्ता ॥

छा. पंचैवानुत्तराणि अनुत्तरगतिभिर्यानि दृष्टानि ।
यत्रानुत्तरदेवा भोगसुखमनुपमं प्राप्ताः ॥

मू. (२२२) *जत्थ अनुत्तरगंधा तहेव रूवा अनुत्तरा सद्दा ।*
अच्चितपुग्गलाणं रसो अ फासो अ गंधो अ ॥

छा. यत्र अनुत्तरगन्धास्तथैव रूपाणि अनुत्तराणि शब्दाश्च ।
अचित्तपुद्गलानां रसश्च स्पर्शश्च गन्धश्च ॥

छा. प्रस्फोटिकलिकालुष्याः प्रस्फुटितकमलरेणुसंकाशाः ।
वरकुसुममधुकरा इव सूक्ष्मतरं नन्दिं घोषयन्ति (आस्वादयन्ति) ॥

मू. (२२४) *वरपउमगब्भगोरा सव्वे ते एगगब्भवसहीओ ।*
गब्भवसहीविमुक्का सुंदरि ! सुक्खं अनुहवंति ॥

छा. वरपद्मगर्भगौराः सर्वे ते एकगर्भवसतयः ।
गर्भवसतिविमुक्ताः सुन्दरि ! सौख्यमनुभवन्ति ॥

मू. (२२५) *तेतीसाए सुंदरि ! वाससहस्सेहिं होइ पुण्णेण ।*
आहाराऽवहि देवाणऽनुत्तरविमाणवासिणं ॥

छा. त्रयस्त्रिंशति पूर्णायां वर्षसहस्राणां सुन्दरि ! पुण्येन ।
आहारावधिर्देवानां अनुत्तरविमानवासिनाम् ॥

मू. (२२६) *सोलसहि सहस्सेहिं पंचेहिं सएहिं होइ पुण्णेहिं ।*
आहारो देवाणं मज्झिमयाउं धरिंताणं ॥

छा. षोडशभिः सहस्रैः पूर्णैः पञ्चभिः शतैर्भवति ।
आहारो देवानां मध्यममायुर्धरताम् ॥

मू. (२२७) *दस वाससहस्साइं जहन्नमाउं धरंति जे देवा ।*
तेसिंपि य आहारो चउत्थभत्तेण बोद्धव्वो ॥

छा. दश वर्षसहस्राणि जघन्यमायुर्धरन्ति ये देवाः ।
तेषामपि चाहारश्चतुर्थभक्तेन बोद्धव्यः ॥

मू. (२२८) *संवच्छरस्स सुंदरि ! मासाणं अद्धपंचमाणं च ।*
उस्साओ देवाणं अनुत्तरविमाणवासीणं ॥

छा. संवत्सरे अर्धपञ्चसु मासेषु च सुन्दरि ! ।
उच्छ्वासो देवानामनुत्तरविमानवासिनाम् ॥

मू. (२२९) *अद्धट्ठमेहिं राइंदिएहिं अट्ठहि य सुतणु ! मासेहिं ।*
उस्सासो देवाणं मज्झिमयमाउं धरिंताणं ॥

छा. अष्टसु मासेषु सार्धसप्तसु सुतनो ! रात्रिन्दिवेषु च ।
उच्छ्वासो देवानां मध्यममायुर्धरताम् ॥

मू. (२३०) *सत्तण्हं थोवाणं पुण्णाणं पुण्णइंदुसरिसमुहे ! ।*
ऊसासो देवाणं जहन्नमाउं धरिंताणं ॥

छा. सप्तसु स्तोकेषु पूर्णेषु पूर्णेन्दुसदृशमुखि ! ।
उच्छ्वासो देवानां जघन्यमायुर्धरताम् ॥

मू. (२३१) *जइ सागरोवमाइं जस्स ठिई तस्स तत्तिएहिं पक्खेहिं ।*
ऊसासो देवाणं वाससहस्सेहिं आहारो ॥

छा. यति सागरोपमाणि यस्य स्थितिस्तस्य ततिभिः पक्षैः ।
उच्छ्वासो देवानां वर्षसहस्रैराहारः ॥

मू. (२३२) *आहारो ऊसासो एसो मे वन्निओ समासेणं ।*
सुहुमंतरायनाहि ! सुंदरि ! अचिरेण कालेण ॥

छा. आहार उच्छ्वास एष मया वर्णितः समासेन ।
सूक्ष्मान्ततयनाभे ! सुन्दरि ! अचिरेण कालेन ॥

मू. (२३३) *एएसिं देवाणं ओही उ विसेसओ उ जो जस्स ।*
तं सुंदरि ! वण्णेऽहं अहक्कमं आनुपुव्वीए ॥

छा. एतेषां देवानामवधिस्तु विशेषतस्तु यो यस्य ।
तं सुन्दरि ! वर्णयिष्याम्यहं यथाक्रमं आनुपूर्व्या ॥

मू. (२३४) *सोहम्मीसाण पढमं दुच्चं च सणंकुमारमाहिंदा ।*
तच्चं च बंभलंतग सुक्कसहस्सारय चउत्थिं ॥

छा. सौधर्मेशानाः प्रथमां द्वितीयां च सनत्कुमारमाहेन्द्राः ।
तृतीयां च ब्रह्मलान्तकाः शुक्रसहस्रारकाश्च ततुर्थीम् ॥

मू. (२३५) *आणयपाणयकप्पे देवा पासंति पंचमिं पुढविं ।*
तं चेव आरणच्चुय ओहियनाणेण पासंति ॥

छा. आनतप्राणतकल्पयोर्देवाः पश्यन्ति पञ्चमीं पृथ्वीम् ।
तामेवारणाच्युता अवधिज्ञानेन पश्यन्ति ॥

मू. (२३६) *छट्ठिं हिट्ठिममज्झिमगेविज्जा सत्तमिं च उवरिल्ला ।*
संभिन्नलोगनालिं पासंति अनुत्तरा देवा ॥

अ. षष्ठीं अधस्तनमध्यमग्रैवेयकाः सप्तमीं चोपरितनाः ।
संपूर्णलोकनालिकां पश्यन्त्यनुत्तरा देवाः ॥

मू. (२३७) *संखिज्जजोयणा खलु तेसिं अद्धसागरो ऊणो ।*
तेण परमसंखिज्जा जहन्नयं पन्नवीसं तु ॥

अ. देवानामूनेऽर्धसागरोपमे आयुषि संख्येययोजनानि ।
ततः परमसंख्येयानि जघन्यतः पञ्चविंशतिं ॥

मू. (२३८) *तेण परमसंखिज्जा तिरियं वीवा य सागरा चेव ।*
बहुययरं उवरिमया उड्ढं तु सकप्पथूभाइं ॥

अ. ततः परेऽसंख्येया द्वीपाः सागराश्चैव तिर्यक् ।
उपरितना बहुकं ऊर्ध्वं तु स्वकल्पस्तूपान् ॥

मू. (२३९) *नेरइयदेवतित्थंकरा य ओहिस्सऽबाहिरा हुंति ।*
पासंति सव्वओ खलु सेसा देसेण पासंति ॥

अ. नैरयिकदेवतीर्थकराश्चावधेरबाह्या भवन्ति ।
पश्यन्ति सर्वतः खलु शेषा देशेन पश्यन्ति ॥

मू. (२४०) *ओहिन्नाणे विसओ एसो मे वण्णिओ समासेणं ।*
बाहल्लं उच्चत्तं विमाणवन्नं पुणो वुच्छं ॥

अ. अवधिज्ञाने विषय एष मया वर्णितः समासेन ।
बाहल्यं उच्चत्वं विमानवर्णं पुनर्वक्ष्ये ॥

मू. (२४१) *सत्तावीसं जोयणसयाइं पुढवीण ताण बाहल्लं ।*
सोहम्मीसाणेसुं रयणविचित्ता य सा पुढवी ॥

अ. सप्तविंशतियोजनशतानि पृथ्वीनां तयोः बाहल्यम् ।
सौधर्मेशानयोः रत्नविचित्रा च सा पृथ्वी ॥

मू. (२४२) *तत्थ विमाणा बहुविहा पासायपगइवेइयारम्मा ।*
वेरुलियथूभियागा रयणामयदामलंकारा ॥

अ. तत्र विमानानि बहुविधानि प्रासादप्रकृतिवेदिकारम्याणि ।
वैडूर्यस्तूपिकानि रत्नमयदामालङ्काराणि ॥

मू. (२४३) *केइत्थऽसियविमाणा अंजणधाउसरिसा सभावेणं ।*
अद्दयरिट्ठसवण्णा जत्थावासा सुरगणाणं ॥

अ. कानिचिदत्र कृष्णानि विमानानि अञ्जनधातुसदृशानि स्वभावेन
आर्द्रकरिष्ठसवर्णानि यत्रावासाः सुरगणानाम् ॥

मू. (२४४) *केइ य हरियविमाणा मेयगधाऊसरिसा सभावेणं ।*
मोरग्गीवसवण्णा जत्थावासा सुरगणाणं ॥

अ. कानिचिच्च हरितानि विमानानि मेदकधातुसदृशानि स्वभावेन ।
मयूरग्रीवसवर्णानि यत्रावासाः सुरगणानाम् ॥

मू. (२४५) दीवसिहासरिसवण्णित्थ केई जासुमणसूरसरिसवन्ना ।
हिंगुलुयधाउवण्णा जत्थावासा सुरगणाणं ॥

छा. दीपशिखासदृशवर्णान्यत्र कानिचित् उपासूरसदृग्वर्णानि ।
हिंगुलकधातुवर्णानि यत्रावासाः सुरगणानाम् ॥

मू. (२४६) कोरिंटधाउवण्णित्थ केई फुल्लकणियारसरिसवण्णा य ।
हालिद्दभेयवण्णा जत्थावासा सुरगणाणं ॥

छा. कोरण्टधातुवर्णान्यत्र कानिचित् विकसितकर्णिकारसदृशवर्णानि
हारिद्रभेदवर्णानि यत्रावासाः सुरगणानाम् ॥

मू. (२४७) अविउत्तमल्लदामा निम्मलगाया सुगंधनीसासा ।
सव्वे अवट्ठियवया सयंपभा अनिमिसच्छा य ॥

छा. अवियुक्तमाल्यदामानो निर्मलगात्राः सुगन्धिनि श्वासाः ।
सर्वेऽवस्थितवयसः स्वयंप्रभा अनिमेषाक्षाश्च ॥

मू. (२४८) बावत्तरिकलापंडिया उ देवा हवंति सव्वेऽवि ।
भवसंकमणे तेसिं पडिवाओ होइ नायव्वो ॥

छा. द्वासप्ततिकलापण्डितास्तु देवा भवन्ति सर्वेऽपि ।
भवसंक्रमणे तेषां प्रतिपातो भवति ज्ञातव्यः ॥

मू. (२४९) कल्लाणफलविवागा सच्छंदविउव्वियाभरणधारी ।
आभरणवसणरहिया हवंति साभावियसरीरा ॥

छा. कल्याणफलविपाकाः स्वच्छन्दविकुर्वितामरणधारिणः ।
आभरणवसनरहिता भवन्ति स्वाभाविकशरीराः ॥

मू. (२५०) वत्तुलसरिसवरूवा देवा इक्कम्मि ठिइविसेसम्मि ।
पन्नग्गऽहीणमहिमा ओगाहणवण्णपरिमाणा ॥

छा. वृत्तसर्षपरूपा देवा एकस्मिन् स्थितिविशेषे ।
प्रत्यग्रा अहीनमहिमावगाहवर्णपरिणामाः ॥

मू. (२५१) किण्हा नीला लोहिय हालिद्दा सुक्किला विरायंति ।
पंचसए उविद्धा पासाया तेसु कप्पेसु ॥

छा. कृष्णा नीला लोहिता हारिद्राः शुक्लाः विराजन्ते ।
पंच शतान्युद्विद्धाः प्रासादास्तेषु कल्पेषु ॥

मू. (२५२) तत्थासणा बहुविहा सयणिज्जा मणिभत्तिसयविचित्ता ।
विरइयवित्थडभूसा रयणामयदामलंकारा ॥

छा. तत्रासनानि बहुविधानि शयनीयानि मणिभक्तिशतविचित्राणि
विरचितविस्तृतभूषाणि रत्नमयदामालंकाराणि ॥

मू. (२५३) छव्वीस जोयणसयाइं पुढवीणं ताण होइ बाहल्लं ।
सणंकुमारमाहिंदे रयणविचित्ता य सा पुढवी ॥

छा. षड्विंशतिर्योजनशतानि पृथ्वीनां तयोः भवति बाहल्यम् ।
सनत्कुमारमाहेन्द्रयोः रत्नविचित्रा च सा पृथ्वी ॥

मू. (२५४) *तत्थ य नीला लोहिय हालिद्दा सुक्किला विरायंति ।*
छच्च सए उव्विद्धा पासाया तेसु कप्पेसु ॥

छा. तत्र च नीला लोहिता हरिद्राः शुक्ला विराजन्ते ।
षट्च शतान्युद्विद्धाः प्रासादाः तेषु कल्पेषु ॥

मू. (२५५) *तत्थ विमाणा बहुविहा० ॥*

छा. तत्र विमानानि बहुविधानि० ॥

मू. (२५६) *पण्णावीसं जोअणसयाइं पुढवीण होइ बाहल्लं ।*
बंभयलंतय कप्पे रयणविचित्ता य सा पुढवी ॥

छा. पंचविंशतिर्योजनानि पृथ्वीनां भवति ।
कल्पे रयणविचित्ता य सा पुढवी ॥

मू. (२५७) *तत्थ विमाण बहुविहा० ॥*

छा. तत्र विमानानि बहुविधा ॥

मू. (२५८) *लोहियहालिद्दा पुण सुक्किलवण्णा य ते विरायंति ।*
सत्तसए उव्विद्धा पासाया तेसु कप्पेसु ॥

छा. लोहिता हरिद्राः पुनः शुक्ल वर्णास्ते विराजन्ते ।
सप्त शनान्यु द्विधाः प्रासादास्तेषु कल्पेषु ॥

मू. (२५९) *चउवीसं जोयणसयाइं पुढवीण होइ बाहल्लं ।*
सुक्के य सहस्सारे रयणविचित्ता य सा पुढवी ॥

छा. चतुर्विंशतिर्योजन शतानि पृथ्व्या भवति बाहुल्यम् ।
शुक्रसहस्रारयोः रत्न विचित्रा सा पृथ्वी ॥

मू. (२६०) *तत्थ विमाण बहुविहा० ॥*

छा. तत्र विमानानि बहुविधानि ॥

मू. (२६१) *हालिद्दभेयवण्णा सुक्किलवण्णा य ते विरायंति ।*
अट्ठ य ते उविद्धा पासाया तेसु कप्पेसुं ॥

छा. हारिद्राभेदवर्णाः शुक्ल वर्णाश्च ते विराजन्ते ।
अष्टौ चयोजन शतान्युद्विधाः प्रासादस्तयोः कल्पयो ॥
अट्ठ य ते उव्विद्धा पासाया तेसु कप्पेसुं ॥

मू. (२६२) *तत्थासणा बहुविहा० ॥*

छा. तत्रासनानि बहुविधानि ॥

मू. (२६३) *तेवीसं जोयणसयाइं पुढवीणं तासिं होइ बाहल्लं ।*
आणयपाणयकप्पे आरणच्चुए रयणविचित्ता उ सा पुढवी ॥

छा. त्रयोविंशतिर्योजन शतानि पृथ्वीनां तासां पुनर्भवति बाहल्यम् ।
रणाच्युतयोश्च रत्नविचित्रातु सा पृथ्वी ॥

मू. (२६४) *तत्थ विमाणा बहुविहा० ॥*

छा. तत्र विमानानि बहुविधानि ॥

मू. (२६५) *संखंकसन्निकासा सव्वे दगरयतुसारसरिवण्णा ।*
नव य सए उव्विद्धा पासाया तेसु कप्पेसुं ॥

छा. शङ्खाङ्कसंनिकाशाः सर्वे दकरजस्तुषार श्वेवर्णाः।
नव शतान्यु द्विधाः प्रासादस्तयोः कल्पयोः ॥

मू. (२६६) *बावीसं जोयणसयाइं पुढवीणं तासिं होइ बाहुल्लं ।*
गेविज्जविमाणेसु रयणविचित्ता उ सा पुढवी ॥

छा. द्वाविंशति योजन शतानि पृथ्वीनां बाहल्यम् ।
ग्रेवेयके विमानेषु रत्न विचित्रा तु सा पृथ्वी ॥

मू. (२६७) *तत्थ विमाणा बहुविहा० ॥*

छा. तत्र विमानानि बहुविधानि० ॥

मू. (२६८) *संखंकसन्निकासा सव्वे दगरयतुसारसरिवण्णा ।*
दस य सए उव्विद्धा पासाया ते विरायंति ॥

छा. शङ्खाङ्कसंनिकाशाः सर्वे दकरजस्तुषारसदृश्वर्णा ।
दश च शतान्युद्विद्धाः प्रासादास्ते विराजन्ते ॥

मू. (२६९) *एगवीसं जोयणसयाइं पुढवीणं तेसिं होइ बाहल्लं ।*
पंचसु अुत्तरेसुं रयणविचित्ता य सा पुढवी ॥

छा. एकविंशतिर्योजनशतानि पृथ्वीनां तासां भवति बाहल्यम् ।
पंचस्वनुत्तरेषु रत्नविचित्रा च सा पृथ्वी ॥

मू. (२७०) *तत्थ विमाणा बहुविहा० ॥*

छा. तत्र विमानानि बहुविधानि० ॥

मू. (२७१) *संखंकसन्निकासा सव्वे दगरयतुसारसरिवण्णा ।*
इक्कारसउव्विद्धा पासाया ते विरायंति ॥

छा. शंखांकसंनिकाशाः सर्वे दकरजस्तुषारसीदृश्वर्णा ।
एकादश शतान्युद्विद्धाः प्रासादारते विराजन्ते ॥

मू. (२७२) *तत्थासणा बहुविहा सयणिज्जा मणिभत्तिसयविचित्ता ।*
विरइयवित्थडदूसा य रयणामयदामलंकारा ॥

छा. तत्रासनानि बहुविधानि शयनीयानि मणिभक्तिशतविचित्राणि ।
विरचितविस्तृतवस्त्राणि रत्नमयदामालकाराणि च ॥

मू. (२७३) *सव्वट्ठविमाणस्स उ सव्वुवरिल्लाउ थूभियंताओ ।*
बारसहिं जोअणेहिं इसिपब्भारा तओ पुढवी ॥

छा. सर्वार्थसिद्धविमानस्य सर्वोपरितनात् स्तूपिकान्तात् ।
ततो द्वादशसु योजनेषु ईषत्प्राग्भारा पृथ्वी ॥

मू. (२७४) *निम्मलदगरयवण्णा तुसारगोखीरफेणसरिवण्णा ।*
भणिया उ जिनवरेहिं उत्ताणयछत्तसंठाणा ॥

छा. निर्मलदकरजोवर्णा तुषारगोक्षीरफेनसदृग्वर्णा ।
भणिता तु जिनवरैरुत्तानकच्छत्रसंस्थाना ॥

मू. (२७५) *पणयालीसं आयामविक्खडा होइ सयसहस्साइं ।*
तं तिउणं सविसेसं परीरओ होइ बोद्धव्वो ॥

छा. पंचचत्वारिंशत्सहस्राणि आयामविस्ताराभ्यां भवन्ति ।
तत्त्रिगुणानि सविशेषाणि परिरयो भवति बोद्धव्यः ॥

मू. (२७६) *एगा जोयणकोडी बायालीसं च सयसहस्साइं ।*
तीसं चेव सहस्सा दो अ तया अउणपन्नासा ॥

छा. एका योजनानां कोटी द्वाचत्वारिंशच्च शतसहस्राणि ।
त्रिंशच्चैव सहस्राणि द्वे च शते एकोनपंचाशत् ॥

मू. (२७७) *खित्तड्ढयविच्छिन्ना अट्ठेव य जोयणाणि बाहल्लं ।*
परिहायमाणी चरिमंते मच्छियपत्ताउ तनुयतरी ॥

छा. क्षेत्रार्धकेऽष्ट योजनानि यावत् बाहल्यमष्ट योजनानि ।
परिहीयमाना चरमान्तेषु मक्षिकापत्रात् तनुतरा ॥

मू. (२७८) *संखंकसन्निकासा नामेण सुदंसणा अमोहा य ।*
अज्जुणसुवण्णयमई उत्ताणयछत्तसंठाणा ॥

छा. शंखांकसन्निकाशा नाम्ना सुदर्शना अमोघा च ।
अर्जुनसुवर्णमयी उत्तानकच्छत्रसंस्थिता ॥

मू. (२७९) *ईसीपब्भाराए सीआए जोअणंमि लोगंतो ।*
तस्सुवरिमम्मि भाए सोलसमे सिद्धमोगाढे ॥

छा. ईषत्प्राग्भारायाः सीतापराभिधानायाः योजने कोलान्तः ।
तस्योपरितनभागे षोडशे सिद्धा अवगाढाः ॥

मू. (२८०) *तत्थेते निच्चयणा भवेयणा निम्मा असंगाय ।*
असरीरा जीवघणा पएसनिव्वत्त संठाणा ॥

छा. तत्रएते निश्चयना अवेदना निर्ममा असंगाय ।
अशरीरा जीव घना प्रदेश निवृत्त संस्थाना ॥

मू. (२८१) *कहिं पडिहया सिद्धा ?, कहिं सिद्धा पइट्ठिया ।*
कहिं बोंदि चइत्ताणं, कत्थ गंतूण सिज्झई ॥

छा. केन सिद्धाः प्रतिहताः क्व सिद्धाः प्रतिष्ठिताः ।
क्व बोन्दिं त्यक्त्वा क्व गत्वा सिद्धयन्ति ॥

मू. (२८२) *अलोए पडिहया सिद्धा, लोयग्गे य पइट्ठिया ।*
इहं बोंदिं चइत्ताणं, तत्थ गंतूण सिज्झई ॥

छा. अलोकेन प्रतिहताः सिद्धा लोकाग्रे च प्रतिष्ठिताः ।
इह बोन्दिं त्यक्त्वा तत्र गत्वा सिध्यंति ॥

मू. (२८३) *जं संठाणं तु इहं भवं चयंतस्स चरमसमयम्मि ।*
आसी य पएसघणं तं संठाणं तहिं तस्स ॥

छा. यत् संस्थानं तु इह भवं त्यजतश्चरमसमये ।
आसीद्य प्रदेशघनं तत् संस्थानं तत्र तस्य ॥

मू. (२८४) *दीहं वा हस्सं वा जं सठाणं हविज्ज चरमभवे ।*
तत्तो तिभागहीणा सिद्धाणोगाहणा भणिया ॥

छा. दीर्घं वा ह्रस्वं वा यत् प्रमाणं भवेत् चरमभवे ।
ततस्त्रिभागहीना सिद्धानामवगाहना भणिता ॥

मू. (२८५) *तिन्नि सया तेत्तीसा धनुत्तिभागो अ होइ बोद्धव्वो ।*
एसा खलु सिद्धाणं उक्कोसोगाहणा भणिया ॥

छा. त्रीणि शतानि षट्त्रिंशद्धनुषस्तृतीयो भागश्च भवति बोद्धव्यः ।
एषा खलु सिद्धानामुत्कृष्टावगाहना भणिता ॥

मू. (२८६) *चत्तारि य रयणीओ रयणी तिभागूणिया य बोद्धव्वा ।*
एसा खलु सिद्धाणं मज्झिमओगाहणा भणिया ॥

छा. चतस्रो रत्नयो रत्नित्रिभागोना च बोद्धव्या ।
एषा खलु सिद्धानां मध्यमाऽवगाहना भणिता ॥

मू. (२८७) *इक्का य होइ रयणी अट्ठेव य अंगुलाइं साहीया ।*
एसा खलु सिद्धाणं जहन्नओगाहणा भणिया ॥

छा. एका च भवति रत्निरष्टावेवांगुलानि साधिकानि ।
एषा खलु सिद्धानां जघन्यिकाऽवगाहना भणिता ॥

मू. (२८८) *ओगाहणाइ सिद्धा भवत्तिभागेण होंति परिहीणा ।*
संठाणमनित्थंत्थं जरामरणविप्पमुक्काणं ॥

छा. अवगाहनायां सिद्धा भवत्रिभागेन भवन्ति परिहीनाः ।
संस्थानमनित्थंस्थं जरामरणविप्रमुक्तानाम् ॥

मू. (२८९) *जत्थ य एगो सिद्धो तत्थ अनंता भवक्खयविमुक्का ।*
अन्नुन्नसमोगाढा पुट्ठा सव्वे अलोगंते ॥

छा. यत्रैकः सिद्धस्तत्रानन्ता भवक्षयविप्रमुक्ताः ।
अन्योऽन्यसमवगाढाः स्पृष्टाः सर्वेऽलोकान्ते ॥

मू. (२९०) *असरीरा जीवघना उवउत्ता दंसणे य नाणे य ।*
सागारमनागारं लक्खणमेयं तु सिद्धाणं ॥

छा. अशरीरा जीवघना उपयुक्ता दर्शने च ज्ञाने च ।
साकारत्वमनाकारत्वं च लक्षणमेतत्तु सिद्धानाम् ॥

मू. (२९१) *फुसइ अनंते सिद्धे सव्वपएसेहिं नियमसो सिद्धो ।*
तेवि असंखिज्जगुणा देसपएसेहिं जे पुट्ठा ॥

छा. स्पृशति अनन्तान् सिद्धान् सर्वप्रदेशैर्नियमतः सिद्धः ।
ये देशप्रदेशैः स्पृष्टास्तेऽप्यसंख्येयगुणाः ॥

मू. (२९२) *केवलनाणुवउत्ता जाणंती सव्वभावगुणभावे ।*
पासंति सव्वओ खलु केवलदिट्ठीअनंताहिं ॥

छा. केवलज्ञानोपयुक्ता जानन्ति सर्वपदार्थगुणभावान् ।
पश्यन्ति सर्वतः खलु केवलदृष्टिभिरनन्ताभि ।।

मू. (२९३) *नाणंमि दंसणम्मि य इत्तो एगयरम्मि उवउत्ता ।*
सव्वस्स केवलिस्सा जुगवं दो नत्थि उवओगा ।।

छा. ज्ञाने दर्शने चानयोरेकतरस्मिन् उपयुक्ताः ।
सर्वस्य केवलिनो युगपद् द्वौ न स्त उपयोगौ ।।

मू. (२९४) *सुरगणसुहं समत्तं सव्वद्धापिंडियं अनंतगुणं ।*
नवि पावइ मुत्तिसुहं णंताहिं वग्गवग्गूहिं ।।

छा. सुरगणसुखं समस्तं सर्वाद्धापिण्डितं अनन्तगुणं ।
नैव प्राप्नोति मुक्तिसुखं अनन्तैर्वर्गवर्गै ।।

मू. (२९५) *नवि अत्थि माणुसाणं तं सुक्खं नवि य सव्वदेवाणं ।*
जं सिद्धाणं सुक्खं अव्वाबाहं उवगयाणं ।।

छा. नैवास्ति मनुष्याणां तत् सौख्यं नैव च सर्वदेवानां ।
यत् सिद्धानां सौख्यमव्याबाधत्वमुपगतानाम्

मू. (२९६) *सिद्धस्स सुहो रासी सव्वद्धापिंडिओ जइ हविज्जा ।*
अनंतगुणवग्गुभइओ सव्वागासे न माइज्जा ।।

छा. सिद्धस्य सुखराशिः सर्वाद्धापिण्डितो यदि भवेत् ।
अनन्तगुणवर्गभक्तः सर्वाकाशे न मायात् ।।

मू. (२९७) *जह नाम कोइ मिच्छो नयरगुणे बहुविहे वियाणंतो ।*
न चएइ परिकहेउं उवमाए तहिं असंतीए ।।

छा. यथा नाम कश्चिन्म्लेच्छो नगरगुणान् बहुविधान् विजानानः ।
न शक्नोति परिकथयितुं तत्रासत्यामुपमायाम् ।।

मू. (२९८) *इअ सिद्धाणं सुक्खं अनोवमं नत्थि तस्स ओवम्मं ।*
किंचि विसेसेणित्तो सारिक्खमिणं सुणह वुच्छं ।।

छा. इति सिद्धानां सौख्यमनुपमं नास्तितस्यौपम्यं ।
किंचिद्विशेषेणातः साधर्म्यमिदं शृ णुत वक्ष्ये ।।

मू. (२९९) *जह सव्वकामगुणियं पुरिसो भोत्तूण भोयणं कोई ।*
तण्हाछुहाविमुक्को अच्छेज्ज जहा अमियतित्तो ।।

छा. यथा सर्वकामगुणितं भोजनं भुक्त्वा कश्चित् पुरुषः ।
तृषा क्षुधा विमुक्त आसीत यथाऽमृततृप्तः ।।

मू. (३००) *इय सव्वकालतित्ता अतुलं निव्वाणमुवगया सिद्धा ।*
सासयमव्वाबाहं चिट्ठंति सुही सुहं पत्ता ।।

छा. इति (एवं) सर्वकालतृप्ताः अतुल्यं निर्वाणमुपगताः सिद्धाः ।
शाश्वतमव्याबाधं सुखिनः सुखं प्राप्तास्तिष्ठन्ति ।।

मू. (३०१) *सिद्धत्ति य बुद्धत्ति य पारगयत्ति य परंपरगयत्ति ।*
उम्मुक्ककम्मकवया अजरा अमरा असंगा य ।।

छा. सिद्ध इति च बुद्ध इति च पारगत इति च परंपरागत इति ।
उन्मुक्तकर्मकवचा अजरा अमरा असंगाश्च ॥

मू. (३०२) *निच्छिन्नसव्वदुक्खा जाइजरामरणबंधणविमुक्का ।*
सासयमव्वाबाहं अनुहवंति सुहं सया कालं ॥

छा. व्युच्छिन्नसर्वदुःखा जातिजरामरणबन्धनविमुक्ताः ।
शाश्वतमव्याबाधत्वमनुभवन्ति सदाकालम् ॥

मू. (३०३) *सुरगणइड्ढिसमग्गा सव्वद्धापिंडियं अनंतगुणा ।*
नवि पावइ जिणइड्ढिं नंतेहिंवि वग्गवग्गूहिं ॥

छा. सुरगणर्द्धि समग्रा सर्वाद्धापिंडिता अनन्तगुणा ।
नैव प्राप्नोति जिनर्द्धि अनन्तैर्वर्गवर्गैरपि ॥

मू. (३०४) *भवणवइवाणमंतरजोइसवासी विमाणवासी य ।*
सव्विड्ढीपरियरिया अरहंते वंदया हुंति ॥

छा. भवनपतयो व्यन्तरा ज्योतिष्कवासिनो विमानवासिनश्च ।
सर्वर्द्धिपरिवृता जिनानां वंदका भवन्ति (वन्दनाय यांति) ॥

मू. (३०५) *भवणवइवाणमंतरजोइसवासी विमाणवासी य ।*
इसिवालियमयमहिया करिंति महिमं जिनवराणं ॥

छा. भवनपतयो व्यन्तरा ज्योतिष्कवासिनो विमानवासिनश्च ।
ऋषिपालितमतमहिताः कुर्वन्ति महिमानं जिनेन्द्राणाम् ॥

मू. (३०६) *इसिवालियस्स भद्दं सुरवरथयकारयस्स वीरस्स ।*
जेहिं सया थुव्वंता सव्वे इंदा पवरकित्ती ॥

छा. ऋषिपालिताय भद्रं वीरस्य सुरवरस्तवकारकाय ।
येन सदा स्तुतिकारकाः सर्वे इन्द्राः परिकीर्त्तिताः (प्रवरकीर्तिताः) ॥

मू. (३०७) *इसिवा० तेसिं सुरासुरगुरू सिद्धा सिद्धिं उवणमंतु ॥*

छा. ऋषिपालिताय भद्रं वीरस्य सुरवरस्य स्तवकारकाय ।
तेषां सुरासुराणां गुरवः सिद्धाः सिद्धिमुपनयन्तु ॥

मू. (३०८) *भोमेज्जवणयराणं जोइसियाणं विमाणवासीणं ।*
देवनिकाया णं (नंदउ) थवो सहस्सं [समत्तो] अपरिसेसो ॥

छा. भौमेयव्यन्तरणां ज्योतिष्काणां विमानवासिनां ।
देवनिकायानां स्तवः अपरिशेषः समाप्तः ॥

३२ नवम प्रकीर्णकं "देवेन्द्रस्तव" समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता देवेन्द्रस्तवप्रकीर्णकस्य
पूज्यपाद् आनंदसागरसूरीश्वरेण सम्पादिता संस्कृतछाया परिसमाप्ता ।

❋ ❋ ❋